१०३
२

103
2

अथ

ग्रन्थनामः- "निरुक्तम्" Nirukta

कर्तृनामः- Yaska

विषयः- वेदाङ्गम्

1.27.S.No.16
MSS. Catalog.

202

श्रीगणेशायनमः॥हरिः ॐ॥ ॥समाम्नायःसमाम्नातःसव्याख्यातव्यस्तमिमंस
माम्नायंनिघंटवइत्याचक्षतेनिघंटवःकस्मान्निगमाइमेभवंतिछंदोभ्यःसमाहृत्यस
माहृत्यसमाम्नातास्तेनिगंतवएवसंतोनिगमनान्निघंटवउच्यंतइत्यौपमन्यवोपिवा
हननादेवस्युःसमाहताभवंतियद्वासमाहृताभवंतितद्यान्येतानिचत्वारिपदजाता
निनामाख्यातेचोपसर्गनिपाताश्चतानीमानिभवंतितत्रैतन्नामाख्यातयोर्लक्षणंप्र
दिशंतिभावप्रधानमाख्यातंसत्वप्रधानानिनामानितद्यत्रोभेभावप्रधानेभवतः
पूर्वापरीभूतंभावमाख्यातेनाचष्टेव्रजतिपचतीत्युपक्रमप्रभृत्यपवर्गपर्यंतंमूर्तं
सत्वभूतंसत्वनामभिर्व्रज्यापक्तिरित्यदइतिसत्वानामुपदेशोगौरश्वःपुरुषोहस्ती
तिभवतीतिभावस्यास्तेशेतेव्रजतितिष्ठतीतीन्द्रियनित्यंवचनमौदुंबरायणः॥१॥ १
तत्रचतुष्ट्वंनोपपद्यतेयुगपदुत्पन्नानांवाशब्दानामितरेतरोपदेशःशास्त्रकृतो

नापरभावमाचष्टे ५

योगश्चव्याप्तिमत्वात्तुशब्दस्याणीयस्त्वाच्चशब्देनसंज्ञाकरणंव्यवहारार्थंलोकेतेषांम
नुष्यवद्देवताभिधानंपुरुषविद्यानित्यत्वात्कर्मसंपत्तिर्मंत्रोवेदेषड्भावविकाराभवंती
तिवार्ष्यायणिर्जायतेस्तिविपरिणमतेवर्धतेपक्षीयतेविनश्यतीतिजायतइतिपूर्व
भावस्यादिमाचष्टेनप्रतिषेधत्यस्तीत्युत्पन्नस्यसत्वस्यावधारणंविपरिणमतइत्य
प्रच्यवमानस्यतत्वाद्विकारंवर्धतइतिस्वांगाभ्युच्चयंसांयोगिकानांवार्थानांवर्धते
विजयेनेतिवावर्धतेशरीरेणेतिवापक्षीयतइत्येतेनैवव्याख्यातःप्रतिलोमंविन
श्यतीत्यपरभावस्यादिमाचष्टेनपूर्वभावमाचष्टेनप्रतिषेधति॥२॥अतोन्येभाव
विकाराएतेषामेवविकाराभवंतीतिहस्माहतेयथावचनमभ्यूहितव्यान्ननिर्बद्धा
उपसर्गाअर्थान्निराहुरितिशाकटायनोनामाख्यातयोस्तुकर्मोपसंयोगद्योत
काभवंत्युच्चावचाःपदार्थाभवंतीतिगार्ग्यस्तद्यएषुपदार्थःप्राहुरिमंतंनामाख्या

तयोरर्थविकरणमाइत्यर्वागर्थेप्रपरेत्येतस्यप्रातिलोम्यमभीत्याभिमुख्यंप्रतीत्येतस्यप्रा
तिलोम्यमतिसुइत्यभिपूजितार्थेनिर्दुरित्येतयोःप्रातिलोम्यंन्यवेतिविनिग्रहार्थीयाउ
दित्येतयोःप्रातिलोम्यंसमित्येकीभावंव्यपेतस्यप्रातिलोम्यमन्वितिसादृश्यापरभावम
पीतिसंसर्गमुपेत्युपजनंपरीतिसर्वतोभावमधीत्युपरिभावमैश्वर्यंवैवमुच्चावचानर्था
न्प्राहुस्तउपेक्षितव्याः॥३॥अथनिपाताउच्चावचेष्वर्थेषुनिपतंत्यप्युपमार्थेपिकर्मोपसं
ग्रहार्थेपिपदपूरणास्तेषामेतेचत्वारउपमार्थेभवंतीवेतिभाषायांचान्वध्यायंचाग्निरि
वेंद्रइवेतिनेतिप्रतिषेधार्थीयोभाषायामुभयमन्वध्यायंनेंद्रंदेवममंसतेतिप्रतिषेधा
र्थीयःपुरस्तादुपचारस्तस्ययत्प्रतिषेधतिदुर्मदासोनसुरायामित्युपमार्थीयउप
रिष्टादुपचारस्तस्ययेनोपमिमीतेचिदित्येषोनेककर्माचार्यश्चिदिदंब्रूयादितिपूजा
यामाचार्यःकस्मादाचार्यआचारंग्राहयत्याचिनोत्यर्थानाचिनोतिबुद्धिमितिवा
दधिचिदित्युपमार्थेकुल्माषांश्चिदाहरेत्यवकुत्सितेकुल्माषाःकुलेषुसीदंतिनु

को

इत्येषोनेककर्मेदंनुकरिष्यतीतिहेत्वपदेशेकथंनुकरिष्यतीत्यनुपृष्टेनन्वेतदकार्षीदि
तिचाथाप्युपमार्थेभवति ॥ वृक्षस्यनुतेपुरुहूतवयाः वृक्षस्येवतेपुरुहूतशाखावयाः
शाखावेतेर्वातायनाभवंतिशाखाःखशयाःशक्नोतेर्वाथयस्यागमादर्थपृथक्त्वमहवि
ज्ञायतेनत्वौद्देशिकमिवविग्रहेणपृथक्त्वात्सकर्मोपसंग्रहश्चेतिसमुच्चयार्थउभाभ्यां
संप्रयुज्यतेहंचत्वंचवृत्रहन्नित्येतस्मिन्नेवार्थेदेवेभ्यश्चपितृभ्यएत्याकारोवेतिविचा
रणार्थेहंताहंपृथिवीमिमांनिदधानीहवेहवेत्यथापिसमुच्चयार्थेभवति ॥ ४ ॥ वायुर्वात्वा
मनुर्वात्वेति । अहइतिचहइतिचविनिग्रहार्थीयौपूर्वेणसंप्रयुज्येतेअयमहेदंकरोत्व
यमिदमिदंहकरिष्यतीदंनकरिष्यतीत्यथाप्युकारएतस्मिन्नेवार्थेउत्तरेणमृषेमेव
दंतिसत्यमुतेवदंतीत्यथापिपदपूरणइदमुतदुहीत्येषोनेककर्मेदंहिकरिष्यतीतिहे
त्वपदेशेकथंहिकरिष्यतीत्यनुपृष्टेकथंहिव्याकरिष्यतीत्यसूयायांकिलेतिविद्याप्र

कर्षएवंकिलेत्यथापिननुइत्येताभ्यांसंप्रयुज्यतेनुपृष्टेनाकिलैवंननुकिलैवंमेतिप्रतिषे
धेमाकार्षर्माहाषीरितिचखल्वितिचखलुकृत्वाखलुकृतमथापिपदपूरणएवंखलुत
द्बभूवेतिशश्वदितिविचिकित्सार्थीयोभाषायांमुभयमन्वध्यायंविचिकित्सार्थीयश्चप
दपूरणश्चागस्त्यइंद्रायहविर्निरूप्यमरुद्भ्यःसंप्र॰शश्वदेवमित्यनुपृष्टएवंशश्वदित्यस्वयं
पृष्टेनूनमितिविचिकित्सार्थीयोभाषाया॰दित्सांचकारइंद्र त्यपरिदेवयांचक्रे॥५॥ स
ननूनमस्तिनोश्वः कस्तद्वेदयदद्भुतं॥अन्यस्यचित्तमभिसंचरेण्यमुताधीतंविनश्यति॥
ननूनमस्त्यद्यतनंनोएवश्वस्तनमद्यास्मिंद्यविदिवमित्यह्नोनामधेयंद्योततइतिसतः
श्वउपाशंसनीयःकालोह्योहीनःकालः॥कस्तद्वेदयदद्भुतंकस्तद्वेदयदभूतमिदमपीत
रदद्भुतमभूतमिवान्यस्यचित्तमभिसंचरेण्यमभिसंचार्यन्योनानेयश्चित्तंचेतनमुता
धीतंविनश्यतीत्याध्यातंविनश्यत्याध्यातमभिप्रेतमथापिपदपूरणः॥६॥नूनं

नि० पू० ४ प्रबंधमाददीत पंचमी कर्माणं सीम्नः सीमतः सीमातो मर्यादातः सीमा मर्यादा विषीव्यति
देशाविति त्व इति विनिग्रहार्थीयं सर्वनामानुदात्तमर्धनामेत्येके ॥ ७ ॥ ऋचां त्वः पोषमा
स्ते पुपुष्वान् गायत्रं त्वो गायति शक्वरीषु ॥ ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां विमिमी
त उ त्वः ॥ इत्यृत्विक्कर्मणां विनियोगमाचष्टे ऋचामेकः पोषमास्ते पुपुष्वान् होतर्ग्र्चनी गा
यत्रमेको गायति शक्वरीषूद्गाता गायत्रं गायतेः स्तुतिकर्मणः शक्वर्य ऋचः शक्नोतेस्त
द्यदाभिर्वृत्रमशकद्धन्तुं तच्छक्वरीणां शक्वरीत्वमिति विज्ञायते ब्रह्मैको जाते जाते विद्यां व
दति ब्रह्मा सर्वविद्यः सर्वं वेदितुमर्हति ब्रह्मा परिवृढः श्रुततो ब्रह्म परिवृढं सर्वतो य
ज्ञस्य मात्रां विमिमीत एकोऽध्वर्युरध्वर्युरध्वरयुरध्वरं युनक्त्यध्वरस्य नेताध्वरं काम
यत इति वापि वाधीयाने युरुपबन्धोऽध्वर इति यज्ञनाम ध्वरतिर्हिंसाकर्मा तत्प्रतिषेधो
निपात इत्येके तत्कथमनुदात्तप्रकृतिनाम स्याद्दृष्टव्ययं तु भवत्युत त्वं सख्ये स्थिरपी ४

तमाहुरिति द्वितीयायामुत त्वस्मै तन्वं विसस्र इति चतुर्थ्यामथापि प्रथमा बहुवचने
॥ अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः ॥ आदघ्नास उपकक्षास उ
त्वे ह्रदा इव स्नात्वा उ त्वे ददृश्रे ॥ अक्षिमन्तः कर्णवन्तः सखायो अक्षि चष्टेरनक्तेरित्याग्रा
यणस्तस्मादेते व्यक्ततरे इव भवत इति ह विज्ञायते कर्णः कृन्ततेर्निकृत्तद्वारो भवत्यृ
च्छतेरित्याग्रायणः ऋच्छन्तीव खे उदगन्तामिति ह विज्ञायते मनसां प्रजवेष्वसमा बभूवु
रास्यदघ्ना अपरे उपकक्षदघ्ना अपरे आस्यमस्यतेरास्यन्दत एनदन्नमिति वा दध्नं द
घ्यतेः स्रवतिकर्मणो दस्यतेर्वा स्याद्विदस्ततरं भवति प्रस्नेया ×ए× ह्रदा इव के प्रस्नेया
ह्रदः शिरस्नाहा ह्रदतेः शब्दकर्मणो ह्लादतेर्वा स्याच्छीतीभावकर्मणोऽथापि समु
च्चयार्थे भवति पर्याया इव त्वदाश्विनं मा श्विनं च पर्यायाश्चेत्यथ ये प्रवृत्तेऽर्थे मिताक्ष
रेषु ग्रन्थेषु वाक्यपूरणा आगच्छन्ति पदपूरणास्ते मिताक्षरेष्वनर्थकाः कमीमिद्विति ॥ ९ ॥

नि॰ पू॰
५

निष्टक्वासश्चिदिन्नरो भूरितोकाद्वृकादिव ॥ बिभ्यस्यंतोववाशिरेशिशिरंजीवनायकं ।
शिशिरंजीवनाय । शिशिरंशृणातेःशम्नातेर्वा । एमेनंसृजतासुते । आसृजतैनंसुते । त
मिद्वर्धंतुनोगिरः । तंवर्धयंतुनोगिरःस्तुतयोगिरोगृणातेः । अयमुतेसमतसि । अयमुतेसम
तसीवापिदृश्यते । सुविदुरिवसुविज्ञायतेइवेत्यथापिनेत्येषइदित्येतेनसंप्रयुज्यतेपारि
भये ॥१०॥ हविर्भिरेकेस्वरितःसचंतेसुन्वंतएकेसवनेषुसोमान् । शचीर्मदंतउतद
क्षिणाभिर्नेज्जिह्मायंत्यानरकंपतामेतिनरकंन्यरकंनीचैर्गमनंनास्मिन्रमणंस्थान
मल्पमप्यस्तीतिवा । अथापिनचेत्येषइदित्येतेनसंप्रयुज्यतेनुपृष्टेनचेत्सुरांपिबंतीति
सुरासुनोतेरेवमुच्चावचेष्वर्थेषुनिपतंतितउपेक्षितव्याः ॥११॥ इतीमानिचत्वारिप
दजातान्यनुक्रांतानिनामाख्यातेचोपसर्गनिपाताश्चतत्रनामान्याख्यातजाता ५
नीतिशाकटायनोनैरुक्तसमयश्चनसर्वाणीतिगार्ग्योवैयाकरणानांचैकेतद्यत्रस्व

सातेप्रतिवरंजरित्रेदुहीयदिंद्रदक्षिणामघोनी ॥ शिक्षास्तोतृभ्योमातिधग्भगोनोबृहद्वदे
मविदथेसुवीराः ॥ सातेप्रतिदुग्धांवरंजरित्रेवरोवरयितव्योभवतिजरितागरितादक्षिणा
मघोनीमघवतीमघमितिधननामधेयंमंहतेर्दानकर्मणोदक्षिणादक्षतेःसमर्धयतिकर्म
णोव्यृद्धंसमर्धयतीत्यपिवाप्रदक्षिणागमनाद्दिशमभिप्रेत्यदिग्घस्तप्रकृतिर्दक्षिणोहस्तो
दक्षतेरुत्साहकर्मणोदाशतेर्वास्याद्दानकर्मणोहस्तोहंतेःप्राशुर्हननेदेहिस्तोतृभ्यःका
मान्मास्मानतिदंहीर्मास्मानतिहायदाभगोनोबृहद्वदेमस्वेवेदनेभगोभजतेर्बृ
हदितिमहतोनामधेयंपरिवृढंभवतिवीरवंतःकल्याणवीरावावीरोवीरयत्यमित्रान्वे
तेर्वास्याद्गतिकर्मणोवीरयतेर्वासीमितिपरिग्रहार्थीयोवापदपूरणोवा ॥ प्रसीमादि
त्योअसृजत् । प्रासृजदितिवाप्रसृजत्सर्वतइतिवाविसीमतःसुरुचोवेनआवरितिच
व्यवृणोत्सर्वतआदित्यःसुरुचआदित्यरश्मयःसुरोचनादपिवासीमित्येतदनर्थकमु

रसंस्कारोसमर्थौप्रादेशिकेनगुणेनान्वितौस्यातांसंविज्ञातानितानियथागौरश्वःपुरुषोह
स्तीत्यथचेत्सर्वाण्याख्यातजानिनामानिस्युर्यःकश्चतत्कर्मकुर्यात्सर्वंतत्सत्वंतथाच
क्षीरन्यःकश्चाध्वानमश्नुवीताश्वःसवचनीयःस्याद्यत्किंचित्तृंद्यात्तृणंतत्तथाचेत्सर्वा
ण्याख्यातजानिनामानिस्युर्यावद्भिर्भावैःसंप्रयुज्येततावद्भ्योनामधेयप्रतिलंभःस्यात्त
त्रैवंस्थूणादरशयावासंजनीचस्यात्॥१२॥अथापियएषांन्यायवान्कर्मनामिकःसंस्का
रोयथाचापिप्रतीतार्थानिस्युस्तथैनान्याचक्षीरन्पुरुषंपुरिशयइत्याचक्षीरन्नष्टेत्य
श्वंतर्दनमितितृणमथापिनिष्पन्नेभिव्याहारेभिविचारयंतिप्रथनात्पृथिवीत्याहुःक
एनामप्रथयिष्यत्किमाधारश्चेत्यथानन्वितेर्थेप्रादेशिकेविकारेपदेभ्यःपदेतरार्धान्
संचकारशाकटायनएतेःकारितंचयकारादिंचांतकरणमस्तेःशुद्धंचसकारादिंचा
थापिसत्वपूर्वोभावइत्याहुरपरस्माद्भावात्पूर्वस्यप्रदेशोनोपपद्यतइतितदेतन्नोप

पद्यते॥१३॥यथोहिनुवाएतत्तद्यत्रस्वरसंस्कारौसमर्थौप्रादेशिकेनगुणेनान्वितौस्यातांस
र्वंप्रादेशिकमित्येवंसत्यनुपालंभएषभवतियथोएतद्यःकश्चतत्कर्मकुर्यात्सर्वंतत्सत्त्वंत
थाचक्षीरन्नितिपश्यामःसमानकर्मणांनामधेयप्रतिलंभमेकेषांनैकेषांयथातक्षापरि
व्राजकोजीवनोभूमिजइत्येतेनैवोत्तरःप्रत्युक्तोयथोएतद्यथाचापिप्रतीतार्थानिस्युस्त
थैनान्याचक्षीरन्नितिसन्त्यल्पप्रयोगाःकृतोऽप्यैकपदिकायथाव्रततिर्दमूनाजाट्यआ
ट्णारोजागरूकोदर्विहोमीतियथोएतन्निष्पन्नेऽभिव्याहारेऽभिविचारयंतीतिभवतिहि
निष्पन्नेऽभिव्याहारेयोगपरीष्टिःप्रथनात्पृथिवीत्याहुःकएनामप्रथयिष्यत्किमाधार
श्चेत्यथवैदर्शनेनपृथुरप्रथिताचेदप्यन्यैस्तथाप्येवंसर्वएवदृष्टप्रवादाउपालभ्यंतेय
थोएतत्पदेभ्यःपदेतरार्धान्त्संचस्कारेतियोऽनन्वितेऽर्थेसंचस्कारसतेनगर्ह्यःसैषापु
रुषगर्हानशास्त्रगर्हाइतियथोएतद्वापरस्माद्भावात्पूर्वस्यप्रदेशोनोपपद्यतइतिपश्या

मेथाप्यविस्पष्टार्था भवंत्यम्यग्यादृश्मिंजारयायिकाणुकेति ॥१५॥ अर्थवंतः शब्दसामान्यादे
तद्वैयज्ञस्यसमृद्धंयद्रूपसमृद्धंयत्कर्मक्रियमाणमृग्यजुर्वाभिवदतीतिचब्राह्मणंक्रीळंतौपु
त्रैर्नप्तृभिरितियथोएतन्नियतवाचोयुक्तयोनियतानुपूर्व्याभवंतीतिलौकिकेष्वप्येतद्यथेंद्रा
ग्नीपितापुत्राविति यथोएतद्ब्राह्मणेनरूपसंपन्ना विधीयंतइत्युदितानुवादः सभवति
यथोएतदनुपपन्नार्थाभवंतीत्याम्नायवचनादहिंसाप्रतीयेत यथोएतद्विप्रतिषिद्धार्था
भवंतीतिलौकिकेष्वप्येतद्यथासपत्नोयंब्राह्मणोनमित्रोराजेतियथोएतज्जानंतंसंप्रेष्य
तीतिजानंतमभिवादयतेजानतेमधुपर्कंप्राहेतियथोएतददितिःसर्वमितिलौकिकेष्वप्ये
तद्यथासर्वरसाअनुप्राप्ताः पानीयमितियथोएतदविस्पष्टार्थाभवंतीति नैषस्थाणो
रपराधोयदेनमंधोनपश्यतिपुरुषापराधः सभवतियथाजानपदीषुविद्यातःपुरुष
विशेषोभवतिपारोवर्यवित्सुतुखलुवेदितृषुभूयोविद्यः प्रशस्योभवति ॥१६॥ अ

थापीदमंतरेणपदविभागोनविद्यते ॥ अवसायपद्वतेरुद्रमृळेतिपद्वदवसंगावः पथ्यदन
मवतेर्गत्यर्थस्यासोनामकरणस्तस्मान्नावगृह्णंत्यवसायाश्वानितिस्यतिरुपसृष्टो
विमोचनेतस्मादवगृह्णंतिदूतोनिर्ऋत्याइदमाजगामेतिपंचम्यर्थप्रेक्षावाषष्ठ्यर्थप्रेक्षा
वाः कारांतंपरोनिर्ऋत्याआचक्ष्वेतिचतुर्थ्यर्थप्रेक्षैकारांतंपरः सन्निकर्षः संहितापद
प्रकृतिः संहितापदप्रकृतीनिसर्वचरणानांपार्षदान्यथापियाज्ञेदैवतेनबहवः प्रदेशाभ
वंतितदेतेनोपेक्षितव्यंतेचेद्ब्रूयुर्लिंगज्ञाअत्रस्मइति ॥ इंद्रंनत्वाशवसादेवतावायुंपृणं
तीतिवायुलिंगंचेंद्रलिंगंचाग्नेयेमंत्रेअग्निरिवमन्योत्विषितः सहस्वेतितथाग्निर्मान्यवे
मंत्रेत्विषितोज्वलितस्त्विषिरित्यप्यस्यदीप्तिनामभवत्यथापिज्ञानप्रशंसाभवत्यज्ञा
ननिंदाच ॥७॥ स्थाणुरयंभारहारः किलाभूदधीत्यवेदंनविजानातियोर्थंयोर्थज्ञइ
त्सकलंभद्रमश्नुतेनाकमेतिज्ञानविधूतपाप्मा ।यद्गृहीतमविज्ञातंनिगदेनैवशब्द्यते ॥

नि०पू०
८

अनग्नाविवशुष्कैधोनतज्ज्वलतिकर्हिचित्।स्थाणुस्तिष्ठतेरर्थोर्त्तेररणस्थोवा॥१८॥ उतत्वःप
श्यन्नददर्शवाचमुतत्वःशृण्वन्नशृणोत्येनां॥उतोत्वस्मैतन्वं१विसस्रेजायेवपत्यउशती
सुवासाः॥अप्येकःपश्यन्नपश्यतिवाचमपिचशृण्वन्नशृणोत्येनामित्यविद्वांसमाहार्धम
प्येकस्मैतन्वंविसस्रइतिस्वमात्मानंविवृणुतेज्ञानंप्रकाशनमर्थस्याहानयावाचोपमो
त्तमयावाचाजायेवपत्येकामयमानासुवासाऋतुकालेषुसुवासाःकल्याणवासाःका
मयमानाऋतुकालेषुयथासएनांपश्यतिशृणोतीत्यर्थज्ञप्रशंसात्तस्योत्तराभूयसे
निर्वचनाय॥१९॥उतत्वंसख्येस्थिरपीतमाहुर्नैनंहिन्वंत्यपिवाजिनेषु॥अधेन्वाचरति
माययैषवाचंशुश्रुवाँअफलामपुष्पां॥अप्येकंवाक्सख्येस्थिरपीतमाहूरममाणं
विपीतार्थंदेवसख्येरमणीयेस्थानइतिवाविज्ञातार्थंयन्नाप्नुवंतिवाग्ज्ञेयेषुबलवत्स्व
प्यधेन्वाह्येषचरतिमाययावाक्प्रतिरूपयानास्मैकामान्दुग्धेवाग्दोह्यान्देवमनुष्यस्थानेषु ८

मःपूर्वोत्पन्नानांसत्वानामपस्माज्ञावाथुर्वेदस्यप्रदेशोन्नामधेयप्रतिलंभमेकेषांनैकेषांयथा
बिल्वादोलंबचूडकइतिबिल्वंभरणाद्वाभेदनाद्वा॥१४॥अथापीदमंतरेणमंत्रेष्वर्थप्रत्ययो
नविद्यतेर्थमप्रतियतोनात्यंतंस्वरसंस्कारोद्देशस्तदिदंविद्यास्थानंव्याकरणस्यकार्त्स्न्यं
स्वार्थसाधकंचयदिमंत्रार्थप्रत्ययायानर्थकंभवतीतिकौत्सोनर्थकाहिमंत्रास्तदेतेनो
पेक्षितव्यंनियतवाचोयुक्तयोनियतानुपूर्व्याभवंत्यथापिब्राह्मणेनरूपसंपन्नाविधी
यंतउरुप्रथस्वेतिप्रथयतिप्रोहाणीतिप्रोहत्यथाप्यनुपपन्नार्थाभवंत्योषधेत्राय
स्वैनंस्वधितेमैनंहिंसीरित्याहहिंसन्नथापिविप्रतिषिद्धार्थाभवंति॥एकएवरुद्रोवत
स्थेनद्वितीयःअसंख्यातासहस्राणियेरुद्राअधिभूम्यां॥अशत्रुरिंद्रजज्ञिषेशतंसे
नाअजयत्साकमिंद्रइत्यथापिजानंतंसंप्रेष्यत्यग्नयेसमिध्यमानायानुब्रूहीत्य
थाप्याहादितिःसर्वमित्यदितिर्द्यौरदितिरंतरिक्षमितितदुपरिष्टाद्व्याख्यास्यामः

योवाचंश्रुतवान्भवत्यफलामपुष्पामित्यफलास्माअपुष्पावाग्भवतीतिवाकिंचित्पुष्प
फलेतिवार्थंवाचःपुष्पफलमाहयाज्ञदैवतेपुष्पफलेदेवताध्यात्मेवासाक्षात्कृतधर्मा
णऋषयोबभूवुस्तेवरेभ्योसाक्षात्कृतधर्मभ्यउपदेशेनमंत्रान्संप्रादुरुपदेशायग्लायंतो
वरेबिल्मग्रहणायेमंग्रंथंसमाम्नासिषुर्वेदंचवेदांगानिचबिल्मंभिल्मंभासनमितिवैतावं
तःसमानकर्माणोधातवोधातुर्दधातेरेतावंत्यस्यसत्वस्यनामधेयान्येतावतामर्थानामि
दमभिधानंनैघंटुकमिदंदेवतानामप्राधान्येनेदमितितद्यदन्यदैवतेमंत्रेनिपततिनैघं
टुकंतत्।अश्वंनत्वावारवंतंअश्वमिवत्वावालवंतंवालादंशवारणार्थाभवंतिदंशोद
शतेः।मृगोनभीमःकुचरोगिरिष्ठाः।मृगइवभीमःकुचरोगिरिष्ठाःमृगोमार्ष्टेर्गतिकर्मणोभी
मोबिभ्यत्यस्माद्भीष्मोप्येतस्मात्कुचरइतिचरतिकर्मकुत्सितमथचेद्देवताभिधानंक्वायंन
चरतीतिगिरिष्ठागिरिस्थायीगिरिःपर्वतःसमुद्गीर्णोभवतिपर्ववान्पर्वतःपर्वपुनःपृणातेः

नि०पू०
१

प्रीणातेर्वा सीमाः सपर्वदेवानास्मिन्प्राणंती तितत्प्रकृतीनरस्तं धिसामान्यान्मेघस्थापर्मियोपिगि
रिरेतस्माद्दैवतद्यानि नामानि प्राधान्यस्तुतीनां देवतानां तद्दैवतमित्याचक्षते तदुपरिष्टाद्व्याख्या
स्यामो नैघंटुकानि नैगमानि हेह ॥२०॥ ॥समाम्नायस्तत्र चतुष्ट्वं मतोन्येथ निपाता वायुर्वत्वान
नूनंनूनं सा तऋचां लोक्षप्यंततोनि ष्वक्रासोह विर्भिरितीमान्यथापियोयथोहिन्वथापीदमर्थ
वंतोथापीदं स्थापुरयमुतत्वः पश्यन्नुतत्वं सरव्ये विंशतिः २०॥ ॥इति निरुक्ते प्रथमो
ध्यायः १ ॐम अथ निर्वचनं तद्येषु पदेषु स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ
नि स्यातां तथा तानि निर्ब्रूयादथानन्वितेर्थेप्रादेशिके विकारेर्थनित्यः परीक्षेत केनचिद्वृत्तिसामा
न्येनाविद्यमाने सामान्येप्यक्षरवर्णसामान्यान्निर्ब्रूयान्नत्वेवन निर्ब्रूयान्न संस्कारमाद्रि
येत विशयवत्यो हि वृत्तयो भवंति यथार्थं विभक्तीः संनमयेत्प्रत्तमवत्तमिति धात्वादी एव शि १
ष्येते अथाप्यस्तेर्निवृत्तिस्थानेष्वादिलोपो भवति स्तः संतीत्यथाप्यंतलोपो भवति गत्वा गतमि

नि०पू० निर्ब्रूयादथतद्धितसमासेष्वेकपर्वसुचानेकपर्वसुचपूर्वंपूर्वमपरमपरंप्रविभज्यनिर्ब्रूयाद्दंड्यः
१० पुरुषोदंडमर्हतीतिवादंडेनसंपद्यतइतिवादंडोददतेर्धारयतिकर्मणोक्रूरोददतेमणिमित्य
भिभाषंतेदमनादित्यौपमन्यवोदंडमस्याकर्षतेतिगर्हायांकक्ष्यारज्जुरश्वस्यकक्षंसेवते
कक्षोगाहतेःक्सइतिनामकरणःख्यातेर्वानर्थकोभ्यासःकिमस्मिन्ख्यानमितिकषते
र्वातत्सामान्यान्मनुष्यकक्षोबाहुमूलसामान्यादश्वस्य॥२॥राज्ञःपुरुषोराजपुरुषः
राजाराजतेःपुरुषःपुरिषादःपुरिशयःपूरयतेर्वापूरयत्यंतरित्यंतरपुरुषमभिप्रेत्य॥
यस्मात्परंनापरमस्तिकिंचिद्यस्मान्नाणीयोनज्यायोस्तिकश्चित्॥वृक्षइवस्तब्धोदिवि
तिष्ठत्येकस्तेनेदंपूर्णंपुरुषेणसर्वमित्यपिनिगमोभवतिविश्वकद्राकर्षेवीतिचकद्रइ
तिश्वगतौभाष्यतेद्रातीतिगतिकुत्सनाकद्रातीतिद्रातिकुत्सनाच्चकद्रातीतिकद्रातीतिस्मि १०
तोनर्थकोभ्यासस्तदस्मिन्नस्तीतिविश्वकद्रःकल्याणवर्णरूपःकल्याणवर्णस्येवास्य

रूपंकल्याणंकमनीयंभवतिवर्णोवृणोतेरूपंरोचतेरेवंतद्धितसमासान्निर्ब्रूयान्नैकपदानि
निर्ब्रूयान्नावैयाकरणायनानुपसन्नायानिदंविदेवानित्यंह्यविज्ञातुर्विज्ञानेसूयोपस
न्नायतुनिर्ब्रूयाद्योवालंविज्ञातुंस्यान्मेधाविनेतपस्विनेवा॥३॥विद्याहवैब्राह्मणमाज
गामगोपायमाशेवधिष्टेहमस्मि।असूयकायानृजवेयतायनमाब्रूयावीर्यवतीतथास्यां॥
यआतृणत्त्यवितथेनकर्णावदुःखंकुर्वन्नमृतंसंप्रयच्छन्।तंमन्येतपितरंमातरंचतस्मैन
द्रुह्येत्कतमच्चनाह॥अध्यापितायेगुरुंनाद्रियंतेविप्रावाचामनसाकर्मणावा।यथैव
तेनगुरोर्भोजनीयास्तथैवतान्नभुनक्तिश्रुतंतत्।यमेवविद्याःशुचिमप्रमत्तंमेधावि
नंब्रह्मचर्योपपन्नं।यस्तेनद्रुह्येत्कतमच्चनाहतस्मैमाब्रूयानिधिपायब्रह्मन्निति।नि
धिःशेवधिरिति॥४॥अथातोनुक्रमिष्यामोगौरितिपृथिव्यानामधेयंयद्दूरंग
ताभवतियच्चास्यांभूतानिगच्छंतिगातेर्वौकारोनामकरणोथापिपशुनामेहभवत्येतस्मा

नि० पू०
११

दिर्वाथाप्यस्यांताद्धितेनकृत्स्नवन्निगमाभवंतिगोभिः श्रीणीतमत्सरमितिपयसोमत्सरः सो
मंदतेस्तृप्तिकर्मणोमत्सरइतिलोभनामाभिमत्तएनेनधनंभवतिपयः पिबतेर्वाप्याय
तेर्वाक्षीरंक्षरतेर्घसेर्वेरोनामकरणउशीरमितियथांशुंदुहंतोअध्यासतेगवीत्यधि
षवणचर्मणोंशुः शमष्टमात्रोभवत्यननायशंभवतीतिवाचर्मचरतेर्वोच्चृत्तंभवतीति श्री
वाथापिचर्मचश्लेष्माचगोभिः सन्नद्धोअसिवीळयस्वेतिरथस्तुतावथापिस्नावच
श्लेष्माचगोभिः सन्नद्धापततिप्रसूतेतीषुस्तुतौज्यापिगौरुच्यतेगव्याचेत्ताद्धि
तमथचेन्नगव्यागमयतीषूनिति ॥५॥ वृक्षेवृक्षेनियतामीमयद्गौस्ततोवयः प्रपता
न्पूरुषादः। वृक्षेवृक्षेधनुषिधनुषिवृक्षोव्रश्चनाद्वृत्वाक्षांतिष्ठतीतिवाक्षाक्षियते
र्निवासकर्मणोनियतामीमयद्गौः शब्दंकरोतिमीमयतिः शब्दकर्माततोततोवयः ११
प्रपतंतिपुरुषानदनायविरितिशकुनिनामवेतेर्गतिकर्मणोथापीषुनामेहभवत्येतस्मा

त्यथाप्युपधालोपोभवतिजग्मतुर्जग्मुरित्यथाप्युपधाविकारोभवतिराजादंडीत्यथापिवर्ण
लोपोभवतितत्वायामीत्यथापिद्विवर्णलोपस्तृचइत्यथादिविपर्ययोभवतिज्योतिर्घनो प्या २
बिंदुर्वाट्यइत्यथाद्यंतविपर्ययोभवतिस्तोकारज्जुः सिकतास्तर्कित्यथांतव्याप
त्तिर्भवति ॥१॥ ओघोमेघोनाधोगाधोवधूर्मध्वित्यथापिवर्णोपजनआस्थद्द्वारोभरूजे
तितद्यत्रस्वरादनंतरांतस्थांतर्धातुर्भवतितद्द्विप्रकृतीनांस्थानमितिप्रदिशंतितत्र
सिद्धायामनुपपद्यमानायामितरयोपपादयिषेत्तत्राप्येकेल्पनिष्पत्तयोभवंतितद्यथैत
दूतिर्मृदुः पृथुः पृषतः कुणारुमित्यथापिभाषिकेभ्योधातुभ्योनैगमाः कृतोभाष्यंतेदमूनाः
क्षेत्रसाधाइत्यथापिनैगमेभ्योभाषिकाउष्णंघृतमित्यथापिप्रकृतयएवैकेषुभाष्यंतेशवतिर्ग
तिकर्माकंबोजेष्वेवभाष्यतेकंबोजाः कंबलभोजाः कमनीयभोजावाकंबलः कमनीयो
भवतिविकारमस्यार्येषुभाषंतेशवइतिदातिर्लवनार्थेप्राच्येषुदात्रमुदीच्येष्वेवमेकपदानि

भाष्यंतेविकृतयएकेषु

देवादित्योपिगोरुच्यते।उतादःपुरुषेगवि।पर्ववतिभास्वतीत्यौपमन्यवोथाप्यस्यैकोरश्मिश्चं
द्रमसंप्रतिदीप्यते।तदेतेनोपेक्षितव्यमादित्यतोस्यदीप्तिर्भवतीतिसुषुम्नःसूर्यरश्मिश्चंद्रमा
गंधर्वइत्यपिनिगमोभवतिसोपिगोरुच्यते॥अत्राहगोरमन्वतेति।तदुपरिष्टाद्व्याख्यास्या
मः।सर्वेपिरश्मयोगावउच्यंते॥६॥तावांवास्तून्युश्मसिगमध्यैयत्रगावोभूरिशृंगाअया
सः।अत्राहतदुरुगायस्यवृष्णःपरमंपदमवभातिभूरि।तानिवांवास्तूनिकामयामहे
गमनाययत्रगावोभूरिशृंगाबहुशृंगाभूरीतिबहुनोनामधेयंप्रभवतीतिसतःशृंगंश्र
यतेर्वाशृणातेर्वाशम्नातेर्वाशरणायोद्गतमितिवाशिरसोनिर्गतमितिवायासोयनास्तत्र
तदुरुगायस्यविष्णोर्महागतेःपरमंपदंपरार्ध्यस्थमवभातिभूरि।पादःपद्यतेस्तन्निधा
नात्पदंपशुपादप्रकृतिःप्रभागपादःप्रभागपादसामान्यादितराणिपदान्येवमन्येषाम
पिसत्वानांसंदेहाविद्यंतेतानिचेत्समानकर्माणिसमाननिर्वचनानिनानाकर्माणिचेन्ना
नानिर्वचनानियथार्थंनिर्वक्तव्यानीतीमान्येकविंशतिःपृथिवीनामधेयान्यनुक्रां

तानितत्रनिर्ऋतिर्निरमणादृच्छतेःकृच्छ्रापत्तिरितरासापृथिव्यांसंदिह्यतेतयोर्विभाग
स्तस्याएषाभवति॥७॥यईंचकारनसोऽअस्यवेदयऽईंददर्शहिरुगिन्नुतस्मात्।स
मातुर्योनापरिवीतोऽअंतर्बहुप्रजानिर्ऋतिमाविवेश॥बहुप्रजाःकृच्छ्रमापद्यतइति
परिव्राजकावर्षकर्मेतिनैरुक्तायईंचकारेतिकरोतिकिरतीसंदिग्धौवर्षकर्मणानसोस्यऽ
वेदमध्यमःसएवास्यवेदमध्यमोयोददर्शादित्योपहितंसमातुर्योनौमातांतरिक्षं
निर्मीयंतेस्मिन्भूतानियोनिरंतरिक्षंमहानवयवःपरिवीतोवायुनायमपीतरोयोनि
रेतस्मादेवपरिवृतोभवतिबहुप्रजाभूमिमापद्यतेवर्षकर्मणा॥शाकपूणिःसंकल्प
यांचक्रेसर्वादेवताजानामीतितस्मैदेवतोभयलिंगाप्रादुर्बभूवतांनजज्ञेतांपप्रच्छवि
विदिषाणित्वेतिसास्माएतामृचमादिदेशैषामद्देवतेति॥८॥अयंसशिंक्तेये
नगौरभीवृतामिमातिमायुंध्वसनावधिश्रिता॥साचित्तिभिर्निहिचकारमर्त्यंविद्यु

नि०पू० १३

नभिषेचयांचक्रे देवापिस्तपः प्रतिपेदे ततः शंतनोराज्ये द्वादशवर्षाणि देवोनववर्षतमू
चुर्ब्राह्मणा अधर्मस्त्वयाचरितोज्येष्ठंभ्रातरमंतरित्याभिषेचितंतस्मात्ते देवोनववर्ष
तीति सशंतनुर्देवापिंशिशिक्षराज्येनतमुवाचदेवापिः पुरोहितस्तेसानियाजया
निचत्वेति तस्यैतद्वर्षकामसूक्तं तस्यैषाभवति ॥१०॥ आर्ष्टिषेणोहोत्रमृषिर्निषी
दन्देवापिर्देवसुमतिं चिकित्वान् ॥ सउत्तरस्मादधरंसमुद्रमपोदिव्याअसृजद्वर्ष्या
अभि। आर्ष्टिषेण ऋष्टिषेणस्यपुत्रइषितसेनस्येतिवासेनासेश्वरासमानगति
र्वापुत्रः पुरुत्रायतेनिपरणाद्वापुन्नरकंततस्त्रायतइतिवाहोत्रमृषिर्निषीदं
नृषिर्दर्शनात्स्तोमान्ददर्शेत्यौपमन्यवस्तद्यदेनांस्तपस्यमानान्ब्रह्मस्वयंभ्वभ्या
नर्षत्तऋषयोभवंस्तदृषीणामृषित्वमिति विज्ञायते देवापिर्देवानामाप्यास्तु
त्याचप्रदानेनचदेवसुमतिंदेवानांकल्याणींमतिंचिकित्वांश्चेतनावान् ।सउ १३

त्तरस्मादधरंसमुद्रं। उत्तर उद्धततरोभवत्यधरोधोराधोनधावतीत्यूर्ध्वगतिः
प्रतिषिद्धातस्योत्तराभूयसेनिर्वचनाय ॥११॥ यद्देवापिः शंतनवेपुरोहितोहोत्राय
वृतः कृपयन्नदीधेत् ॥ देवश्रुतंवृष्टिवनिंरराणोबृहस्पतिर्वाचमस्मा अयच्छत्।
शंतनुः शंतनोस्त्वितिवाशमस्मैतन्वाअस्त्वितिवापुरोहितः पुरएनंदधतिहोत्रायवृ
तः कृपायमाणोन्वध्यायद्देवश्रुतंदेवाएनंशृण्वंतिवृष्टिवनिंवृष्टियाचिनंरराणो
रातिरभ्यस्तो बृहस्पतिर्ब्रह्मासीत्सोस्मैवाचमयच्छद्बृहदुपव्याख्यातं ॥१२॥ सा
धारणान्युत्तराणिषड्दिवश्चादित्यस्यचयानितुस्यप्राधान्येनोपरिष्टात्तानि
व्याख्यास्यामः आदित्यः कस्मादादत्तेरसानादत्तेभासंज्योतिषामादीप्तोभा
सेतिवादितेः पुत्रइतिवाल्पप्रयोगंत्वस्यैतदार्चाभ्याम्नायेसूक्तभाक्सूर्यमा
दितेयमदितेः पुत्रमेवमन्यासामपिदेवतानामादित्यप्रवादाः स्तुतयोभवंतितद्य

नि०पू०
१४

थेतन्मित्रस्यवरुणस्यार्यम्णोदक्षस्यभगस्यांशस्येत्यथापिमित्रावरुणयोः।आदि
त्यादानुनस्पतीदानपती।अथापिमित्रस्यैकस्य।प्रसमित्रमर्तोअस्तुप्रयस्वान्य
स्तआदित्यशिक्षतिव्रतेनेत्यपिनिगमोभवत्यथापिवरुणस्यैकस्य।अथावय
मादित्यव्रतेतव।व्रतमितिकर्मनामनिवृत्तिकर्मवारयतीतिसतइदमपीतरद्व्रत
मेतस्मादेववृणोतीतिसतोन्नमपिव्रतमुच्यतेयदावृणोतिशरीरं।१३।स्वरादि
त्योभवतिसुअरणःसुईरणःस्वृतोरसान्स्वृतोभासंज्योतिषांस्वृतोभासेति
वैतेनद्यौर्व्याख्यातापृश्निरादित्योभवतिप्राश्नुतएनंवर्णइतिनैरुक्ताःसंस्प्रष्टार
सान्संस्प्रष्टाभासंज्योतिषांसंस्पृष्टोभासेतिवाथद्यौःसंस्पृष्टाज्योतिर्भिःपुण्यकृ
द्भिश्च।नाकआदित्योभवतिनेतारसानांनेताभासांज्योतिषांप्रणयोथद्यौःकमि १४
तिसुखनामतत्प्रतिषिद्धंप्रतिषिध्येतनवाअमुंलोकंजग्मुषेकिंचनाकं।नवा

द्भवंतीप्रतिवव्रिमौहत।अयंसशब्दायतेयेनगौरभिप्रवृत्तामिमातिमायुंशब्दंकरोति
मायुमिवादित्यमितिवावागेषामाध्यमिकाध्वंसनेमेघेधिश्रितासाचित्तिभिःकर्म
भिःनीचैर्निकरोतिमर्त्यंविद्युद्भवंतीप्रत्यूहतेवव्रिंवव्रिरितिरूपनामवृणोतीतिस
तोवर्षेणप्रच्छाद्यपृथिवींतत्पुनरादत्ते॥९॥हिरण्यनामान्युत्तराणिपंचदशहिरण्यंक
स्माद्ध्रियतआयम्यमानमितिवाह्रियतेजनाज्जनमितिवाहितरमणंभवतीतिवाहृ
दयरमणंभवतीतिवाहर्यतेर्वास्यात्प्रेप्साकर्मणोंतरिक्षनामान्युत्तराणिषोळशांत
रिक्षंकस्मादंतराक्षांतंभवत्यंतरेमेइतिवाशरीरेष्वंतरक्षयमितिवातत्रसमुद्रइत्येत
त्पार्थिवेनसमुद्रेणसंदिह्यतेसमुद्रःकस्मात्समुद्द्रवंत्यस्मादापःसमभिद्रवंत्येनमा
पःसमोदंतेस्मिन्भूतानिसमुदकोभवतिसमुनत्तीतिवातयोर्विभागस्तत्रेतिहा
समाचक्षतेदेवापिश्चार्ष्टिषेणःशंतनुश्चकौरव्यौभ्रातरौबभूवतुःसशंतनुःकनीय

अमुंलोकंजग्मुषेकिंचनाकंनवाअमुंलोकंगतवतेकिंचनासुखंपुण्यकृतोह्येवतत्रा
छंति।गौरादित्योभवतिगमयतिरसान्गछत्यंतरिक्षेथद्यौर्यत्पृथिव्याअधिदूरंगता
भवतियच्चास्यांज्योतींषिगछंति।विष्टबादित्योभवत्याविष्टोरसानाविष्टोभासंज्यो
तिषामाविष्टोभासेतिवाथद्यौराविष्टाज्योतिर्भिःपुण्यकृद्भिश्च।नभआदित्योभ
वतिनेतारसानांनेताभासांज्योतिषांप्रणयोपिवाभनएवस्याद्विपरीतोननभाती
तिवैतेनद्यौर्व्याख्याता।।१४।।रश्मिनामान्युत्तराणिपंचदशरश्मिर्यमनात्तेषामा
दितःसाधारणानिपंचाश्वरश्मिभिर्दिङ्नामान्युत्तराण्यष्टौदिशःकस्माद्दिशतेरा
सदनादपिवाभ्यशनात्तत्रकाष्टाइत्येतदनेकस्यापिसत्वस्यनामभवतिकाष्ठादि
शोभवंतिक्रांत्वास्थिताभवंतिकाष्ठाउपदिशोभवंतीतरेतरंक्रांत्वास्थिताभवंत्या
दित्योपिकाष्ठोच्यतेक्रांत्वास्थितोभवत्याज्यंतोपिकाष्ठोच्यतेक्रांत्वास्थितोभव

त्यापोपिकाष्ठाउच्यंतेक्रांत्वास्थिताभवंतीतिस्थावराणां॥१५॥अतिष्ठंतीनामनिवेश
नानांकाष्ठानांमध्येनिहितंशरीरंवृत्रस्यनिण्यंविचरंत्यापोदीर्घंतमआशयदिंद्रशत्रुः॥
अतिष्ठंतीनामनिवेशनानामित्यस्थावराणांकाष्ठानांमध्येनिहितंशरीरंमेघःशरीरं
शरीरंशृणातेःशम्नातेर्वावृत्रस्यनिण्यंनिर्माणंविचरंतिविजानंत्यापइतिदीर्घंद्राघते
स्तमस्तनोतेराशयदाशेतेरिंद्रशत्रुरिंद्रोस्यशमयितावाशातयितावातस्मादिंद्रश
त्रुस्तत्कोवृत्रोमेघइतिनैरुक्तास्त्वाष्ट्रोसुरइत्यैतिहासिकाअपांचज्योतिषश्चमिश्री पां
भावकर्मणोवर्षकर्मजायतेतत्रोपमार्थेनयुद्धवर्णाभवंत्यहिवत्तुखलुमंत्रवर्णाब्रा
ह्मणवादाश्चविवृद्ध्याशरीरस्यस्रोतांसिनिवारयांचकारतस्मिन्हतेप्रसस्यंदि
रआपस्तदभिवादिन्येषाभवति॥१६॥दासपत्नीरहिगोपाअतिष्ठन्निरुद्धाआपः १५
पणिनेवगावः॥अपांबिलमपिहितंयदासीद्वृत्रंजघन्वाँअपतद्ववार॥दासपत्नी

थाप्रसूतासवितुःसवायऽएवारात्र्युषसेयोनिमारैक्।इदंश्रेष्ठंज्योतिषांज्योतिरागाच्चि
त्रप्रकेतनंप्रज्ञाततममप्रजनिष्टविभूततमंयथाप्रसूतासवितुःसवायरात्रिरादि
त्यस्यैवंरात्र्युषसेयोनिमारिचत्स्थानंस्त्रीयोनिरभियुतएनांगर्भस्तस्याएषापराभव
ति॥१९॥रुशद्वत्सारुशतीश्वेत्यागादारैगुकृष्णासदनान्यस्याः।समानबंधूऽ
अमृतेअनूचीद्यावावर्णंचरतआमिनाने।रुशद्वत्सासूर्यवत्सारुशदितिवर्णना
मरोचतेर्ज्वलतिकर्मणः सूर्यमस्यावत्समाहसाहचर्याद्रसहरणाद्वारुशतीश्वेत्य
गात्।श्वेत्याश्वेततेररिचत्कृष्णासदनान्यस्याः।कृष्णवर्णारात्रिःकृष्णंकृष्यतेर्नि
कृष्टोवर्णोऽथैनेसंस्तौतिसमानबंधूसमानबंधनेअमृतेअमरणधर्माणावनूचीऽ
अनूच्याविततीतरेतरमभिप्रेत्यद्यावावर्णंचरतस्तेएवद्यावौद्योतनादपिवाद्यावाऽ
चरतस्तयासहचरतइतिस्यादामिनानेअभिन्वानेअन्योन्यस्याध्यात्मकुर्वाणेअ

हर्नामान्युत्तराणिद्वादशाह्नःकस्मादुपाहरंत्यस्मिन्कर्माणितस्यैषनिपातोभवति
वैश्वानरीयायामृचि॥२०॥अहश्चकृष्णमहरर्जुनंचविवर्तेतेरजसीवेद्याभिः।वै
श्वानरोजायमानोनराजेवातिरज्योतिषाग्निस्तमांसि।अहश्चकृष्णंरात्रिःशुक्लं
चाहरर्जुनंविवर्तेतेरजसीवेद्याभिर्वेदितव्याभिःप्रवृत्तिभिर्वैश्वानरोजायमा
नइवोद्यन्नादित्यःसर्वेषांज्योतिषांराजावाहन्नग्निर्ज्योतिषातमांसिमेघना
मान्युत्तराणित्रिंशन्मेघःकस्मान्मेहतीतिसतउपरउपलइत्येताभ्यांसाधा
रणानिपर्वतनामभिरुपरउपलोमेघोभवत्युपरमंतेस्मिन्नभ्राण्युपरताआपइ
तिवातेषामेषाभवति॥२१॥देवानांमानेप्रथमाअतिष्ठन्कृंतत्रादेषामुपराउद
यन्।त्रयस्तपंतिपृथिवीमनूपाद्वाबृबूकंवहतःपुरीषं।देवानांनिर्माणेप्रथमाऽ
अतिष्ठन्माध्यमकादेवगणाःप्रथमइतिमुख्यनामप्रतमोभवतिकृंतत्रमंतरिक्षं

विकर्तनेनमेघानांविकर्तनेनमेघानामुदकंजायते।त्रयस्तपंतिपृथिवीमनूपाःपर्जन्योवा
युरादित्यःशीतोष्णवर्षैरोषधीःपाचयंत्यनूपाअनुवपंतिलोकान्स्वेनस्वेनकर्मणा
यमपीतरोनूपएतस्मादेवानूप्यतउदकेनापिवान्वाबितिस्याद्यथाप्रागितितत्स्या
नूपइतिस्याद्यथाप्राचीनमिति॥द्वादशकृत्वहतःपुरीषंवाय्वादित्याउदकंकृक
कमित्युदकनामब्रवीतेर्वाशब्दकर्मणोभ्रंशतेर्वापुरीषंपृणातेःपूरयतेर्वा॥२२।
वाङ्नामान्युत्तराणिसप्तपंचाशद्वाक्कस्माद्वचेस्तत्रसरस्वतीत्येतस्यनदीवद्देवता
वच्चनिगमाभवंतितद्यद्देवतावदुपरिष्टात्तद्व्याख्यास्यामोथैतन्नदीवत्॥२३।इयं
शुष्मेभिर्बिसखाइवारुजत्सानुगिरीणांतविषेभिरूर्मिभिः।पारावतघ्नीमवसेसुवृक्ति
भिःसरस्वतीमाविवासेमधीतिभिः॥इयंशुष्मैःशोषणैःशुष्ममितिबलनामशो
षयतीतिसतोबिसंबिस्यतेर्भेदनकर्मणोवृद्धिकर्मणोवासानुसमुच्छ्रितंभवति॥ १७

दासाधिपत्नीर्दासोदस्यतेरुपदासयतिकर्मणोहिगोपाःअतिष्ठन्नहिनागुहा।अ
हिरयनादेत्यंतरिक्षेयमपीतरोहिरेतस्मादेवनिर्ह्रसितोपसर्गआहंतीति।निरु
द्धाआपःपणिनेवगावःपणिर्वणिग्भवतिपणिःपणनाद्वणिक्पण्यंनेनेक्ति।अपां
बिलमपिहितंयदासीत्।बिलंभरंभवतिबिभर्तेर्वृत्रंजघ्निवानपववार।तद्वृत्रोवृ
णोतेर्वावर्ततेर्वावर्धतेर्वायदवृणोत्तद्वृत्रस्यवृत्रत्वमितिविज्ञायतेयदवर्ततत
द्वृत्रस्यवृत्रत्वमितिविज्ञायतेयदवर्धततद्वृत्रस्यवृत्रत्वमितिविज्ञायते॥१७॥रा
त्रिनामान्युत्तराणित्रयोविंशतीरात्रिःकस्मात्प्ररमयतिभूतानिनक्तंचारीण्युप
रमयतीतराणिध्रुवीकरोतिरातेर्वास्याद्दानकर्मणःप्रदीयतेस्यामवश्यायःउषो
नामान्युत्तराणिषोडशोषाःकस्मादुच्छतीतिसत्याराात्रेरपरःकालस्तस्याएषाभ
वति॥१८॥इदंश्रेष्ठंज्योतिषांज्योतिरागाच्चित्रःप्रकेतोअजनिष्टविभ्वा॥य

समुन्नुन्ना भवति वा महद्भिरूर्मिभिः पारावतघ्नी पारावारघातिनी पारं परं भवत्यवारमव
रमवरमायस्तू प्रवृत्ताभिः शोभनाभिः स्तुतिभिः सरस्वतीं नदीकर्मभिः परिचरेमेदक
नामान्युत्तराण्येकशतमुदकं कस्मादुनत्तीति सतो नदीनामान्युत्तराणि सप्तत्रिंशन्न
द्यः कस्मान्नदना इमा भवंति शब्दवत्या बहुकमासां नैघंटुकं वृत्तमाश्चर्यमिव प्राधान्ये
न तत्रेतिहासमाचक्षते विश्वामित्र ऋषिः सुदासः पैजवनस्य पुरोहितो बभूव विश्वा
मित्रः सर्वमित्रः सर्वं संसृतं सुदाः कल्याणदानः पैजवनः पिजवनस्य पुत्रः पिजवनः
पुनः स्पर्धनीयजवो वामिश्रीभावगतिर्वा स वित्तं गृहीत्वा विपाट्छुतुद्र्योः संभेदमाय
यावनुययुरितरे स विश्वामित्रो नदीस्तुष्टाव गाधा भवतेत्यपि द्विवदपि बहुवत्तद्य
द्द्विवदुपरिष्टात्तद्व्याख्यास्यामोऽथैतद्बहुवत् ॥२४॥ रमध्वं मे वचसे सोम्याय ऋताव
रीरुप मुहूर्तमेवैः प्र सिंधुमच्छा बृहती मनीषावस्युरह्वे कुशिकस्य सूनुः उपरमध्वं मे

वचसेसोम्यायसोमसंपादिन्नकृतावरीकृतवत्यत्रकृतमित्युदकनामप्रत्यृतंभवतिसु
कृतमिवैरयनैरयन्नैवामिमुकृतौमुकृकृतुकृतुरतेर्गतिकर्मणोमुकृमृढइवकाष्ठांयावदभी
क्ष्णंचेत्यभीक्ष्णमभिक्षणंभवतिक्षणःक्षणोतेःप्रक्ष्णुतःकाष्ठःकालःकालयतेर्गति
कर्मणःप्राविध्ययामिसिंधुंहहत्यामहत्यामनीषयामनसईषयास्तुत्याप्रज्ञया
वावनायकुशिकस्यसूनुःकुशिकोराजाबभूवक्रोशतेःशब्दकर्मणःक्रंशतेर्वास्या
त्प्रकाशयतिकर्मणःसाधुर्विक्रोशयितार्थानामितिवानद्यःप्रत्यूचुः॥२५॥इंद्रोऽ
अस्मांऽअरदद्वज्रबाहुरपाहन्वृत्रंपरिधिंनदीनां॥देवोनयत्सवितासुपाणिःस्तस्य
वयंप्रसवेयामऽउर्वीः॥ इंद्रोऽअस्मानरदद्वज्रबाहूरदितिःखनतिकर्मापाहन्वृत्रं
परिधिंनदीनामितिव्याख्यातंदेवोनयत्सवितासुपाणिःकल्याणपाणिःपाणिःपणा
यतेःपूजाकर्मणःप्रगृह्यपाणीदेवान्पूजयंति।तस्यवयंप्रसवेयामऽउर्वीः।उर्व्यऽ

नि॰ पू॰ पिकक्षआसन्न।तिव्याख्यातंकुतुंद्रधिका:कर्मवासज्ञांवा।अनुसंतवीत्वत।ततो
तेःश्रूर्वयाप्रकृत्यानियमःपृथामंकासिपथांकुटिलानिपंथाःपततेर्वापद्यतेर्वापं
१९ थतेर्वाकोंचतेपैरापनीफणोलेश्चर्करीतवृतंदशोत्तराण्यधिष्टोपयोजनानीत्याचक्ष
तेसाहचर्यज्ञानायज्वलतिकर्माणउत्तरेधातवएकादशतावंत्येवोत्तराणिज्वलतो
नामधेयानिनामधेयानि॥२८॥ ॥अथनिर्वचनमोघोराज्ञोविद्याहवाअथा
तोनुक्रमिष्यामोवृक्षेवृक्षेतावांवास्तूनियईचकारायंसशिंड्रूहिरण्यनामान्याष्ट्रि
षणीयद्देवापिःसाधारणानिस्वरादित्यारश्मिनामान्यतिष्ठंतीनांदासपत्नीरात्रि
नामानिदंश्रेष्ठंरूशद्वत्साहश्चिकच्छंदेवानांमानवाङ्नामानीयंशफश्मेभीरमध्वं १९
मइंद्रोऽअस्मानातेकारोतितस्यवाज्यष्टाविंशतिः २९। इतिनिरुक्त
पूर्वषट्के द्वितीयोध्यायः ॥७॥ ॥६॥ ॥७॥ ॥६॥ ॥८॥

ॐ श्रम॥कर्मनामान्युत्तराणिषड्विंशतिःकर्मकस्मात्क्रियतइतिसतोपत्यनामान्युत्त
राणिपंचदशापत्यंकस्मादपततंभवतिनानेनपततीतिवातद्यथाजनयितुःप्रजै
वमर्थीयेऋचाउदाहरिष्यामः॥१॥परिषद्यंह्यरणस्यरेक्णोनित्यस्यरायःपतय
स्याम॥नशेषोऽअग्नेअन्यजातमस्त्यचेतानस्यमापथोविदुक्षः।परिहर्तव्यंहि
नोपसर्तव्यमरणस्यरेक्णोरणोपार्णोभवतिरेक्णइतिधननामरिच्यतेप्रयतो
नित्यस्यरायःपतयस्यामपित्र्यस्येवधनस्य।नशेषोऽअग्नेअन्यजातमस्ति।शे
षइत्यपत्यनामशिष्यतेप्रयतोचेतयमानस्यतत्प्रमत्तस्यभवतिमानःपथोवि
दूदुषइतितस्योत्तराभूयसेनिर्वचनाय॥२॥नहिग्रभायारणःसुशेवोन्योदर्यो
मनसामंतवाउ॥अधाचिदोकःपुनरित्सएत्यानोवाज्यभीषाळेतुनव्यःनहिग्रहीत
व्योरणःसुखतमोप्यन्योदर्योमनसापिनमंतव्योममायंपुत्रइत्यथसओकः

नि॰पू॰
२०

पुनरेवतदेतियतआगतोभवत्योकइतिनिवासनामोच्यतएतुनोवाजीविजनवानभि
षह्यमाणःसपत्नान्नवजातःसएवपुत्रइत्यथैतांदुहितृदायाद्यउदाहरंतिपुत्रदाया
द्यइत्येके॥३॥शासद्वह्निर्दुहितुर्नप्त्यंगाद्विद्वाँऋतस्यदीधितिंसपर्यन्॥पितायत्रदु
हितुःसेकमृंजन्त्संशग्म्येनमनसादधन्वे।प्रशास्तिवोढासंतानकर्मणेदुहितुःपुत्रभावं
दुहितादुर्हितादूरेहितादोग्धेर्वानप्तारमुपागमद्दौहित्रंपौत्रमितिविद्वान्प्रजननयज्ञ
स्यरेतसोवांगादंगात्संभूतस्यहृदयादधिजातस्यमातरिप्रत्यृतस्यविधानंपूजयन्न
विशेषेणमिथुनाःपुत्रादायादाइतितदेतदृक्श्लोकाभ्यामुक्तं।अंगादंगात्संभवसि
हृदयादधिजायसे।आत्मावैपुत्रनामासिसजीवशरदःशतमित्यविशेषेणपुत्रा
णांदायोभवतिधर्मतःमिथुनानांविसर्गादौमनुःस्वायंभुवोब्रवीत्।नदुहितरइत्ये २०
केतस्मात्पुमान्दायादोदायादस्त्रीतिविज्ञायतेतस्मात्स्त्रियंजातांपरास्यंतिनपुमां

र्णोतेर्वृणोतेरित्यौर्णवाभः।अत्याख्यायंततःआशुरश्नुवः॥२६॥अतेकारोशृ
णवामावचांसियययाथदूरादनसारथेन॥नितेनंसैपीप्यानेवयोषामर्यायेवकन्या
शश्वचैते।आशृणवामतेकारोवचनानियाहिदूरादनसाचरथेनचनिनमामतेपा
ययमानेवयोषापुत्रंमर्यायेवकन्यापरिष्वजनायनिनमाइतिवास्वनामान्युत्तराणि
षड्विंशतिरेषामष्टाउत्तराणिबहुवद्रश्वःकस्मादश्नुतेध्वानंमहाशनोभवतीति
वात्तत्रदधिक्राइत्येतद्दधिक्रामतीतिवादधत्क्रंदतीतिवादधदाकारीभवतीतिवा
तस्याश्ववद्देवतावच्चनिगमाभवंतितद्यद्देवतवद्देवउपरिष्टात्तद्व्याख्यास्यामोऽथै
तदश्ववत्॥२७॥उतस्यवाजीक्षिपणिंतुरण्यतिग्रीवायांबद्धोअपिकक्षआसनि
क्रतुंदधिक्राअनुसंतवीत्वत्पथामंकांस्यन्वापनीफणत्॥अपिसवाजीविजन
वान्क्षिपणमनुतूर्णमश्नुतेध्वानंग्रीवायांबद्धोग्रीवागिरतेर्वागृणातेर्वागृह्णातेर्वा

समितिचस्त्रीणांदानविक्रयातिसर्गाविद्यंतेनपुंसःपुंसोपीत्येकेशौनःशेपेदर्शनात्।अभ्रातृमतीवादइत्यपरं।अमूर्यायंतिजामयःसर्वालोहितवाससः।अभ्रातरइवयोषास्तिष्ठंतिहतवर्त्मानः।अभ्रातृकाइवयोषास्तिष्ठंतिसंतानकर्मणेपिंडदानायहतवर्त्मानइत्यभ्रातृकायाअनिर्वाहऔपमिकस्तस्योत्तराभूयसेनिर्वचनाय॥४॥अभ्रातेवपुंसएतिप्रतीचीगर्तारुगिवसनयेधनानां।जायेवपत्यउशतीसुवासाउषाहस्रेवनिरिणीतेअप्सः॥अभ्रातृकेवपुंसःपितॄनेत्यभिमुखीसंतानकर्मणेपिंडदानायनपतिंगर्तारोहिणीवधनलाभायदाक्षिणाजीगर्तःसभास्थाणुर्गृणातेःसत्यसंगरोभवतितंतत्रयापुत्रायापतिकासारोहतितांतत्राक्षैराघ्नंतिसारिक्थंलभतेश्मशानसंचयोपिगर्तउच्यतेगुरतेरपगूर्णोभवतिश्मशानंश्मशयनंश्मशरीरंशरीरंशृणातेःशम्नातेर्वाश्मश्रुलोमश्मनिश्रितंभवतिलोमलुनातेर्वालीयतेर्वा

नोपरस्याविःकुर्याद्यदुपरस्याविःकुर्याद्गर्त्तेष्ठास्यात्प्रमायुकोयजमानइत्यपिनिगमो
भवतिरथोपिगर्त्तउच्यतेगृणातेःस्तुतिकर्मणःस्तुततमंयानं।आरोहथोवरुणमि
त्रगर्त्तमित्यपिनिगमोभवतिर्जायेवपत्येकामयमानासुवासाऋतुकालेषूषाहस
नेवदंतान्विवृणुतेरूपाणि।तिचतस्रउपमानाभ्रात्रीमुपयच्छेततोकंह्यस्यतद्भव
तीत्यभ्रातृकायाउपयमनप्रतिषेधःप्रत्यक्षःपितुश्चपुत्रभावःपितायत्रदुहितु
रपत्यापारतःसेकंमार्जयतिसंदधात्यात्मानंसंगमेननमनसेत्यथैताजाम्यारि
क्थप्रतिषेधउदाहरंतिज्येष्ठंपुत्रिकायाइत्येके।।५।।नजामयेतान्वोरिक्थमारै
क्चकारगर्भंसनितुर्निधानं।यदीमातरोजनयंतवह्निमन्यःकर्तासुकृतोरन्यऋं
धन्।।नजामयेभगिन्यैजामिरन्येस्यांजनयंतिजामपत्यंजमतेर्वास्याद्गतिक
र्मणोनिर्गमनप्रायाभवतितान्वआत्मजःपुत्रोरिक्थंप्रारेचत्प्रादाच्चकारेना

नि० पू० २२

स्न मितिवा। पंचजना मम होत्रं जुषध्वं। गंधर्वाः पितरो देवा असुरा रक्षांसीत्येके चत्
त्वारो वर्णाः निषादः पंचम इत्यौपमन्यवो निषादः कस्मान्निषदनो भवति निषण्ण
मस्मिन्पापकमिति नैरुक्ताः। यत्पांचजन्यया विशा। पंचजनीनया विशा पंच पृक्ता सं
ख्या स्त्रीपुंनपुंसकेष्वविशिष्टा बाहुनामान्युत्तराणि द्वादश बाहुः कस्मात्प्रबाधत आ
भ्यां कर्माण्यंगुलिनामान्युत्तराणि द्वाविंशतिरंगुलयः कस्मादग्रगामिन्यो भवंती
ति वाग्रगालिन्यो भवंतीति वाग्रकारिण्यो भवंतीति वाग्रसारिण्यो भवंतीति वां
कना भवंतीति वांजना भवंतीति वापि वाभ्यंचनादेव स्युः तासामेषा भवति दशाव
निभ्यो दशकक्ष्येभ्यो दशयोक्त्रेभ्यो दशयोजनेभ्यः। दशाभीशुभ्यो ऽर्चताजरेभ्यो
दशधुरो दशयुक्ता वहद्भ्यः। अवनयोंऽगुलयो भवंत्यवंति कर्माणि कक्ष्याः प्रकाशयंति
कर्माणि योक्त्राणि योजनानीति व्याख्यातमभीशवोऽभ्यश्नुवते कर्माणि। दशधुरो दश २२

युक्ता वहद्भ्यः। धूर्धूर्वतेर्वधकर्मण इयमपीतरा धूरेतस्मादेव विहंति वहं धारयतेर्वा कां
तिकर्माण उत्तरे धातवोऽष्टादशान्ननामान्युत्तराण्यष्टाविंशतिरन्नं कस्मादानतं भू
तेभ्योऽत्तेर्वा त्तिकर्माण उत्तरे धातवो दश बलनामान्युत्तराण्यष्टाविंशतिर्बलं कस्मा
द्बलं भरं भवति बिभर्तेर्धननामान्युत्तराण्यष्टाविंशतिरेव धनं कस्माद्धिनोतीति स
तो गोनामान्युत्तराणि नव क्रुध्यतिकर्माण उत्तरे धातवो दश क्रोधनामान्युत्तराण्ये
कादश गतिकर्माण उत्तरे धातवो द्वाविंशशतं क्षिप्रनामान्युत्तराणि षड्विंशतिः क्षिप्रं
कस्मात्संक्षिप्तो विकर्षो ऽन्तिकनामान्युत्तराण्येकादशांतिकं कस्मादानीतं भवति
संग्रामनामान्युत्तराणि षट्चत्वारिंशत्संग्रामः कस्मात्संगमनाद्वा संगरणाद्वा
संगतौ ग्रामाविति वा तत्र खल इत्येतस्य निगमा भवंति। ।९।। अभीदमेकमेको अ
अस्मि निष्षाळ् अभी द्वा किमु त्रयः करंति। खले न पर्षान्प्रति हन्मि भूरि किं मा निंदंति

नि०पू० शत्रवो मिंद्राः। अभिभवामीदमेकमेकोऽस्मि निःषहमाणः सपत्नानभिभवामि द्वौ किं
मा त्रयः कुर्वंत्येक इता संख्या द्वौ द्रुततरा संख्या त्रयस्तीर्णतमा संख्या चत्वारश्चलिततमा
२३ न३ संख्याष्टावश्नोतेर्नव वननीया नावाप्ता वा दश दस्ता दृष्टार्था वा विंशतिर्द्विर्दशतः शतं दशा दशा
नियुतं४ तः सहस्रं सहस्वद्युतं प्रयुतं तत्तदभ्यस्तमंबुदो मेघो भवत्यरणमंबु तद्दोंऽबुदोंऽबुमद्भातीति
वांबुमद्भवतीति वा स यथा महान्बहुर्भवति वर्षंस्तदिवार्बुदं खलेन पर्षान्प्रति हन्मि भू
रि। खल इव पर्षान्प्रति हन्मि भूरि खल इति संग्रामनाम खलतेर्वा स्खलतेर्वायमपीत
रः खल एतस्मादेव समास्कन्नो भवति। किं मा निंदंतिशत्रवो मिंद्राः॥ य इंद्र वर्ध्वि
द्वो य ह मस्य निंद्रा इतर इति वा व्याप्तिकर्माण उत्तरे धातवो द्वादश तत्र द्वेनामनी। आ
क्षाण आश्नुवान आपान आप्नुवानो वधकर्माण उत्तरे धातवस्त्रयस्त्रिंशत्तत्र विया
त इत्येतद्वियातयन्न इति वा वियातयेति वा। आखंडल प्रहूयसे। आखंडयितः खंड २३

ळि ९ खंडयतेः स्नथेरित्यंतिकवधयोः संसृष्टकर्मताडयतीतिसतः।१०॥त्वयावयंसुवृधाब्र
ह्मणस्पतेस्पार्हावसुमनुष्याददीमहि।यानोदूरेतळितोयाअरातयोभिसंतिजंभया
ताअनप्नसः।त्वयावयंसुवर्धयित्वाब्रह्मणस्पतेस्पृहणीयानिवसूनिमनुष्येभ्यआ
ददीमहि।याश्चनोदूरेतळितायाश्चांतिकेरातयोदानकर्माणोवादानप्रज्ञावाजंभ
यताअनप्नसोप्रइतिरूपनामाप्नोतीतिसतोविद्युत्तळिद्भवतीतिशाकपूणिः।सा
ह्यवताडयतिदूराच्चदृश्यतेपित्विदमंतिकनामैवाभिप्रेतंस्याद्दूरेचित्संतळिदिवा
तिरोचसे।दूरेपिसन्नंतिकइवसंदृश्यसइतिवज्रनामान्युत्तराण्यष्टादशवज्रः
कस्माद्वर्जयतीतिसतस्तत्रकुत्सइत्येतत्कृततेःऋषिःकुत्सोभवतिकर्तास्तोमा
नामित्यौपमन्यवोत्राप्यस्यवधकर्मैवभवतितत्सखइंद्रःशुष्णंजघानेत्यैश्वर्य
कर्माणउत्तरेधावतश्चत्वारईश्वरनामान्युत्तराणिचत्वारितत्रेनइत्येतत्सनितं

नि॰ पू॰ २४

श्वर्येतिवासनितमनेनैश्वर्यमितिवा ॥११॥ यत्रासुपर्णाअमृतस्यभागमनिमेषंविदथा
भिस्वरंति॥ इनोविश्वस्यभुवनस्यगोपाः समाधीरः पाकमत्राविवेश॥ यत्रसुपर्णाः सुप
तनाआदित्यरश्मयोमृतस्यभागमुदकस्यानिमिषंतोवेदनेनाभिस्वरंतीतिवाभिप्रयं
तीतिवेश्वरःसर्वेषांभूतानांगोपायितादित्यःसमाधीरःपाकमत्राविवेशेतिधीरोधीमा
न्पाकःपक्तव्योभवतिविपक्वप्रज्ञआदित्यइत्युपनिषद्वर्णोभवतीत्यधिदैवतमथा
ध्यात्मंयत्रसुपर्णाःसुपतनानीन्द्रियाण्यमृतस्यभागंज्ञानस्यानिमिषंतोवेदने
नाभिस्वरंतीतिवाभिप्रयंतीतिवेश्वरःसर्वेषामिंद्रियाणांगोपायितात्मासमाधीरः
पाकमत्राविवेशेतिधीरोधीमान्पाकःपक्तव्योभवतिविपक्वप्रज्ञआत्मेत्यात्मगति
माचष्टे ॥१२॥ बहूनिनामान्युत्तराणिद्वादशबहुकस्मात्प्रभवतीतिसतोह्रस्वनामा २४
न्युत्तराण्येकादशह्रस्वोह्रसतेर्महन्नामान्युत्तराणिपंचविंशतिर्महान्कस्मान्माने न॰

नि०पू० मुपमिमीते तस्करस्तत्करो भवति यत्पापकमिति नैरुक्तास्तनोतेर्वा स्यात्संततकर्मा भवत्यहो
२५ रात्रकर्मा वा । शरनाभिर्दशभिरभ्यधीतां । अभ्यधीतामित्यधातां ज्यायांस्तत्र गुणोऽभिप्रेतः
॥१४॥ कुह स्विद्दोषा कुह वस्तोरश्विना कुहाभिपित्वं करतः कुहोषतुः । को वां शयुत्रा विधवे
मर्य व देवरं मर्यं न योषा कृणुते सधस्थ आ । क्व स्विद्रात्रौ भवथः क्व दिवा क्वाभिप्राप्तिं कुरुतः क्व व
सथः को वां शयने विधवेव देवरं देवरः कस्माद्द्वितीयो वर उच्यते विधवा विधातृका भव
ति विधवनाद्वा विधावनाद्वेति चर्मशिरा अपि वा धव इति मनुष्यनाम तद्वियोगाद्विध
वा देवरो दीव्यतिकर्मा मर्यो मनुष्यो मरणधर्मा योषा यौतेराकुरुते सहस्थाने अथ निपा
ताः पुरस्तादेव व्याख्याता यथेति कर्मोपमा ॥ यथा वातो यथा वनं यथा समुद्र एज
ति । भ्राजन्तो अग्नयो यथा । आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा । आत्मा
वतेर्वातेर्वा पि वाप्त इव स्याद्यावद्व्याप्तिभूत इति । अग्निर्न ये भ्राजसा रुक्मवक्षसः । २५

अग्निरिव ये मरुतो भ्राजमाना रोचिष्णूरस्का भ्राजस्वन्तो रुक्मवक्षसः ॥१५॥ चतु
रश्चिद्ददमानाद्बिभीयादा निधातोः । न दुरुक्ताय स्पृहयेत् ॥ चतुरोऽक्षान्धारयत इति त
द्यथा कितवाद्बिभीयादेवमेव दुरुक्ताद्बिभीयान्न दुरुक्ताय स्पृहयेत् । कदाचिदित्या
कार उपसर्गः । पुरस्तादेव व्याख्यातोऽथाप्युपमार्थे दृश्यते । जार आ भगं । जार इव भगमा
दित्योऽत्र जार उच्यते । रात्रेर्जरयिता स एव भासां तथापि निगमो भवति । स्वसुर्जारः शृणो
तु न इत्युषसमस्य स्वसारमाह साहचर्याद्रसहरणाद्वापि स एवं मनुष्यजार एवाभिप्रे
तः स्त्रीभगस्तथा स्याद्भजतेर्मेष इति भूतोपमा । मेषो भूतो ३ भियन्नयः । मेषो मिष
तेस्तथा पशुः पश्यतेरग्निरिति रूपोपमा । हिरण्यरूपः स हिरण्यसंदृगपान्नपात्सेदु
हिरण्यवर्णः । हिरण्यवर्णस्येवास्य रूपं थाइति च । तत्प्रत्नथा पूर्वथा विश्वथेमथा । प्रत्नइव
पूर्वइव विश्वइवेमइवेत्ययमेततरामुष्मादसावस्ततरोऽस्मादमुथा यथासाविति व्य

नि०पू० २६

ख्यातंवदतीतिसिद्धोपमा।ब्राह्मणवद्वृषलवत्।ब्राह्मणाइवद्वृषलाइवेतिवृषलोवृषशीलो
भवतिवृषाशीलोवा।१६।प्रियमेधवदत्रिवज्जातवेदोविरूपवत्।अंगिरस्वन्महिव्रत
प्रस्कण्वस्यश्रुधीहवं।प्रियमेधःप्रियाअस्यमेधायथैतेषामृषीणामेवंप्रस्कण्वस्य
शृणुह्वानंप्रस्कण्वःकण्वस्यपुत्रःकण्वप्रभवोयथाप्राग्रमर्चिषिभृगुःसंबभूवभृगुर्भृ
ज्यमानोनदेहेंगारेष्वंगिराअंगाराअंकनाअंचनाअत्रैवतृतीयमृच्छतेत्यूचुस्तस्माद
त्रिर्नत्रयइतिविखननाद्वैखानसोभरणाद्भरद्वाजोविरूपोनानारूपोमहिव्रतोमहाव्र
तइति।१७।अथलुप्तोपमान्यर्थोपमानीत्याचक्षतेसिंहोव्याघ्रइतिपूजायांश्वाका
कइतिकुत्सायांकाकइतिशब्दानुकृतिस्तदिदंशकुनिषुबहुलंनशब्दानुकृतिर्विद्य
तइत्यौपमन्यवःकाकोपकालयितव्योभवतीतितित्तिरिस्तरणात्तिलमात्रचित्रइतिवा २६
कपिंजलःकपिरिवजीर्णःकपिरिवजवतईषत्पिंगलोवाकमनीयंशब्दंपिंजयति।

नान्यान्जहातीतिशाकपूणिर्मंहनीयोभवतीतिवातत्रववक्षिथविवक्षसइत्येतेवक्ते
र्वावहतेर्वासाभ्यासादृहनामान्युत्तराणिद्वाविंशतिर्गृहाःकस्माद्गृह्णंतीतिसतांपरि
चरणकर्माणीत्युत्तरेधातवोदशसुखनामान्युत्तराणिविंशतिःसुखंकस्मात्सुहितं
खेभ्यःखंपुनःखनतेरूपनामान्युत्तराणिषोडशरूपंरोचतेःप्रशस्यनामान्युत्तराणि
दशप्रज्ञानामान्युत्तराण्येकादशसत्यनामान्युत्तराणिषट्सत्यंकस्मात्सत्सुतायते
सत्प्रभवंभवतीतिवाष्टाउत्तराणिपदानिपश्यतिकर्माण्युत्तरेधातवश्चायतिप्रभृ
तीनिचनामान्यामिश्राणिनवोत्तराणिपदानिसर्वपदसमाम्नायाथातउपमायदत
त्तत्सदृशमितिगार्ग्यस्तदासांकर्मज्यायसावागुणेनप्रख्याततमेनवाकनीयांसंवाप्र
मि ख्यातंवोपमिमीतेथापिकनीयसाज्यायांसं।१३।तनूत्यजेवतस्करावनर्गूरशनाभि
र्दशभिरभ्यधीतां।तनूत्यक्तनूत्यक्तावनर्गूवनगामिनावग्निमंथनौबाहूतस्कराभ्यां।

तिवाश्वाशश्रयायीशवतेर्वास्याक्रुन्तिकर्मणःश्वसितेर्वासिंहःसहनाद्धिंसेर्वास्याद्विपरी
तस्यसंपृक्तस्यवाहंतेःसंहायहंतीतिवाव्याघ्रोव्याघ्राणाद्व्यादायहंतीतिवा॥१८॥अ
र्चतिकर्माणउत्तरेधातवश्चतुश्चत्वारिंशन्मेधाविनामान्युत्तराणिचतुर्विंशतिर्मेधावी
कस्मान्मेधयातद्वान्भवतिमेधामतोधीयतेस्तोतृनामान्युत्तराणित्रयोदशस्तोता
स्तवनाद्यज्ञनामान्युत्तराणिपंचदशयज्ञःकस्मात्प्रख्यातंयजतिकर्मेतिनैरुक्तायाच्
ञोभवतीतिवायजुरुन्नोभवतीतिवाबहुकृष्णाजिनइत्यौपमन्यवोयजूंष्येनंन
यंतीतिवार्त्विङ्नामान्युत्तराण्यष्टावृत्विक्कस्मादीरणःऋग्यष्टाभवतीतिशाकपूणिर्ऋ
तुयाजीभवतीतिवायाच्ञाकर्माणउत्तरेधातवःसप्तदशदानकर्माणउत्तरेधातवो
दशाध्येषणाकर्माणउत्तरेधातवश्चत्वारःस्वपितिसस्तीतिद्वौस्वपितिकर्माणौ
कूपनामान्युत्तराणिचतुर्दशकूपःकस्मात्कुपानंभवतिकुप्यतेर्वास्तेननामान्युत्त

नि०५०
२७

त
राणिचतुर्दशैवस्तेनः कस्मात्संस्त्यानमस्मिन्पापकमिति नैरुक्ता निण्यंऽतर्हितना
मधेयान्युत्तराणिषण्णिण्यंऽतं कस्मान्निर्णिक्तं भवति दूरनामान्युत्तराणिपंचदूरं
कस्माद्द्रुतं भवति दुरयं वा पुराणनामान्युत्तराणिषट्पुराणं कस्मात्पुरानवं भव
ति नवनामान्युत्तराणिषट्नवं कस्मादानीतं भवति ।।१९।। द्विरुत्तराणिनामानिप्र
पित्वेऽभीक इत्यासन्नस्य प्रपित्वे प्राप्तेऽभीकेऽभ्यक्ते ।। आपित्वेनः प्रपित्वे तूयमागहि ।।
अभीके चिदु लोककृदित्यपि निगमौ भवतो दभ्रमर्भकमित्यल्पस्य दभ्रं दभ्नोतेः
सुदंभं भवत्यर्भकमवहृतं भवति ।। उपोपमेपरामृश मामेदभ्राणिमन्यथाः ।।
नमोमहद्भ्यो नमो अर्भकेभ्य इत्यपि निगमौ भवतस्तिरः सत इति प्राप्तस्य
तिरस्तीर्णं भवति सतः संसृतं भवति ।। तिरश्चिदर्यया परि वर्तिर्यात्तऽ २७
मदाभ्या ।। पात्रेव भिन्दन्त्सत एति रक्षस इत्यपि निगमौ भवतस्त्वोऽ

आरमंतएनं ।आत्वारंभंन जिव्रयो ररंभेत्यपि निगमो भवत्यारभामहेत्वाजीर्णाइव
दंडं पिनाकं प्रतिपिनष्ट्येनेन कृत्तिवासाः पिनाकहस्तोवततधन्वेत्यपि निगमो भवति मे
नाग्नाइतिस्त्रीणां स्त्रियस्त्यायतेरपत्रपणकर्मणो मेनामानयंत्येनाग्नागच्छंत्येना: ।अ
मेनांश्चिज्जनिवतश्चकर्थ ।यास्त्वाकृंतन्नपसोतन्वतेनेत्यपि निगमो भवतः शेपो वैत
सइति पुंस्प्रजननस्य। शेपः शपतेः स्पृशतिकर्मणो वैतसो वितस्तं भवति। यस्या
मुशंतः प्रहराम शेपं ॥ त्रिः स्म माह्नः श्नथयो वैतसेनेत्यपि निगमो भवति। अयं नेड इत्यु
परेशस्य।अयाते अग्ने समिधा विधेमेति स्त्रियाः। एनावोअग्निमिति नपुंसकस्य।ए
नापत्या तन्वं संसृजस्वेति पुंसः।सिषक्तु सचतइति सेवमानस्य।स नः सिषक्तु यस्त
रः स्तनः सेवतां यस्करः।स्तचस्वानस्वस्तये।सेवस्व नः स्वस्तये।स्वस्तीत्यविनाशिना
मास्तिरभिपूजितः।स्वस्तीतिभ्यसतेरेजत इति भयवेपनयोः। यस्य शुष्माद्रोदसी ऽ

अभ्यसेतां ।रेजते अग्ने पृथिवी मखेभ्य इत्यपि निगमो भवतो द्यावापृथिवीनामधेयान्यु
त्तराणि चतुर्विंशतिस्तेषामेषा भवति।।२१।।कतरा पूर्वा कतरापरायोः कथा जातं कवयः
को विवेद।।विश्वं त्मना बिभृतो यद्ध नाम विवर्तते अहनी चक्रियेव ।कतरा पूर्वा कतरा परैन
योः कथं जातं कवयः क एने विजानाति सर्वमात्मना बिभृतो यद्ध नयोः कर्म विवर्तेते च
नयोरहनी अहोरात्रे चक्रयुक्ते इवेति द्यावापृथिव्योर्महिमानमाचष्टआचष्टे ।।२२।। ।।
कर्मनामानि परिषष्यं न हियं भायशसहदिद्व कृरत्रातेवनजामयेमनुष्यनामानितद्यदर्श
वनिभ्योभीदं त्वयावयं यत्रासुपर्णा बहूनामानि नकृत्यजेवककुहस्विच्चतुरश्चिन्नियमं
धवदयसुतोपमान्यर्चतिद्विशारंभः कतरापूर्वा द्वाविंशतिः।।२२।। ।।इति निरु
क्ते द्वितीयोध्यायः २ ॐ एकार्थमनेकशब्दमित्येतदुक्तमथयान्यनेकार्थान्येकशब्दानि
तान्यतोनुक्रमिष्यामोनवगतसंस्कारांश्च निगमांस्तदैकपदिकमित्याचक्षतेजहाजया

नेत्यर्थः ॥१॥ कोनुमर्याऽअमिथितः सखासखायमब्रवीत्। जहाकोअस्मदीषते। मर्यादिनिम
नुष्यनाममर्यादाभिधानंवास्यान्मर्यादामर्यैरादीयतेमर्यादामर्यादिनोर्विभागोमेथतिराक्रो
शकर्मापापकंजघानकमहंजातुकोस्मद्भीतः पलायतेनिधापश्याभवतिपन्निधीयतेपा
श्यापाशसमूहः पाशः पाशयतेर्विपाशनात्। २॥ वयः सुपर्णाउपसेदुरिंद्रंप्रियमेधा
ऋषयोनाधमानाः॥ अपध्वांतमूर्णुहिपूर्धिचक्षुर्मुमुग्ध्य१स्मान्निधयेवबद्धान्॥ वयोवे
र्वद्रुवचनंसुपर्णाः सुपतनाआदित्यरश्मयउपसेदुरिंद्रंयाचमानाअपोर्णुह्याध्वस्तंच
क्षुश्चक्षुः ख्यातेर्वाचष्टेर्वापूर्धिपूरयदेहीतिवामुंचास्मान्। पाशैरिवबद्धानूपार्श्वतः श्रो
णितःसितामतः पार्श्वंपर्शुमयमंगंभवतिपर्शुः स्पृशतेः संस्पृष्टापृष्ठदेशपृष्ठस्पृशतेः
संस्पृष्टमंगेरंगमंकनादंचनाद्वाश्रोणिः श्रोणतेर्गतिचलाकर्मणः श्रोणिश्चलतीव
गच्छतोदोः शितामभवतिदोर्द्रवतेर्योनिः शितामेनिशानाग्निविषितोभवतिश्यामतोयकृ
त्तइतितैटीकिः श्यामंश्यायतेर्यकृद्यथाकथाचकृत्यतेशितिमांसतोमेदस्तइतिगा

रुचानेमइत्यर्थस्यलोपस्ततोनेमोपरीतोर्धहातेर्विपरीताधारयतेर्वास्यादुद्धृतंभवत्युद्धे
तेर्वास्यादुद्भूतनमोविभागः। पीयतिर्वाअनुर्वाङ्गृणातिनेमेदेवानेमेसुराइत्यपिनिगमो
भवतऋक्षास्तृभिरितिनक्षत्राणांनक्षत्राणिनक्षतेर्गतिकर्मणोनेमानिक्षत्राणी
वेतिचब्राह्मणमृक्षाउदीर्णानीवख्यायंतेस्तृभिस्तीर्णानीवख्यायंते। अमीयऋक्षा
निहितासऽउच्चा। पश्यंतोद्यामिवस्तृभिरित्यपिनिगमोभवतोवम्रीभिरुपजिह्विका
इतिसीमिकानांवम्रयोवमनात्सीमिकास्यमनादुपजिह्विकाउपजिघ्र्यः॥ वम्रीभिः
पुत्रमग्रुवोअदानं। यदत्त्युपजिह्विकायद्वम्रोअतिसर्पति। त्यपिनिगमोभवत
ऊदरंकूदरमित्यावपनस्थोदरमुदीर्णंभवत्यूर्जेदीर्णंवा। तमूदरंपृणतायवेने
त्यपिनिगमोभवतितमूदरमिवकुरुयातियवेनकूदरंकृतदरंभवति। समिद्धोअ
ञ्जन्कूदरंमतीनामित्यपिनिगमोभवति॥२०॥ रंभः पिनाकमितिदंडस्य। रंभ

लवःशिश्निःश्नथतेर्मासमानंवामानसंवामनोस्मि त्वस्मीतिवामेदोमेदयतेः।यदिं
द्रचित्रमेहनास्तित्वादातमद्रिवः।राधस्तन्नोविदद्वसउभयाहस्त्याभर।यदिंद्रचित्रंचा
कनीयंमंहनीयंधनमस्तियन्मइहनास्तीतिवात्रीणिमध्यमानिपदानित्वयानस्तद्दा
तव्यमद्रिवन्नद्रिरादृणात्येनेनापिवात्तेःस्यात्तेसोमादइतिहविज्ञायतेराधइतिधनना
मराध्नुवंत्येनेनतन्नस्त्वंवित्तधनोभाभ्यांहस्ताभ्यामाहरोभौसमुब्धौभवतोदमूनाद
ममनावादानमनावादांतमनावापिवादमइतिगृहनामतन्मनाःस्यान्मनोमनोतेः॥४
जुष्टोदमूनाअतिथिर्दुरोणइमंनोयज्ञमुपयाहिविद्वान्॥विश्वाअग्नेअभियुजो
विहत्याशत्रूयतामाभराभोजनानि॥अतिथिरभ्यतितोगृहान्भवत्यभ्येतितिथिषु
परकुलानीतिवापरगृहाणीतिवादुरोणइतिगृहनामदुरवाभवंतिदुस्तर्पाइमंनोय
ज्ञमुपयाहिविद्वान्सर्वाअग्नेअभियुजोविहत्याशत्रूयतामाभरभोजनानिविहत्य

न्येषांबलानिशात्रूणांभवनाद्वाहरभोजनानीतिवाधनानीतिवामूषोमूषिकाइत्य
र्थोमूषिकाःपुनर्मुष्णातेर्मूषोप्येतस्मादेव॥५॥संमातपंत्यभितःसपत्नीरिवपर्श
वः।मूषोनशिश्नाव्यदंतिमाध्यःस्तोतारंतेशतक्रतोवित्तंमेअस्यरोदसी॥संतपं
तिमामभितःसपत्न्यइवेमाःपर्शवःकूपपर्शवोमूषिकाइवास्नातानिसूत्राणिव्य
दंतिस्वांगाभिधानंवास्यात्शिश्नानिव्यदंतीतिवासंतपंतिमाध्यःकामाःस्तोतारं
तेशतक्रतोवित्तंमेअस्यरोदसी॥जानीतमेस्यद्यावापृथिव्याविति।त्रितंकूपेवहित
मेतत्सूक्तंप्रतिबभौतत्रब्रह्मेतिहासमिश्रमृङ्मिश्रंगाथामिश्रंभवति।त्रितस्तीर्ण
तमोमेधयाबभूववापिवासंख्यानामेवाभिप्रेतंस्यादेकतोद्वितस्त्रितइतित्रयोबभूवुः
॥६॥इषिरेणतेमनसासुतस्यभक्षीमहिपित्र्यस्येवरायः।सोमराजन्प्रणआयूं
षितारीरहानीवसूर्योवासराणि॥इषिरेणनेषणेनवार्षणेनवातेमनसासुतस्यभ ३०

नि० पू० ३१

वतिकसतेर्वास्याद्विपरीतस्यविकासितोभवतियत्रधीरामनसावाचमकृषतप्रज्ञानंधीराः
प्रज्ञानवंतोध्यानवंतस्तत्रसखायःसख्यानिसंजानतेभद्रैषांलक्ष्मीर्निहिताधिवाची।
तिभद्रंभगेनव्याख्यातंभजनीयंभूतानामभिद्रवणीयंभवद्रमयतीतिवाभाजनवद्वाल
क्ष्मीर्लाभाद्वालक्षणाद्वालप्स्यनाद्वालाञ्छनाद्वालषतेर्वास्यात्प्रेप्साकर्मणोलग्यतेर्वा
स्यादाश्लेषकर्मणोलज्जतेर्वास्यादश्लाघाकर्मणः।शिप्रेइत्यस्यपरिष्टाद्व्याख्यास्यामः
१०॥तत्सूर्यस्यदेवत्वंतन्महित्वंमध्याकर्तोर्विततंसंजभार॥यदेदयुक्तहरितःसध
स्थादाद्रात्रीवासस्तनुतेसिमस्मै॥तत्सूर्यस्यदेवत्वंतन्महित्वंमध्येयत्कर्मणांक्रिय
माणानांविततंसंह्रियतेयदासावयुंक्तहरणानादित्यरश्मीन्हरितोश्वानितिवाथरा
त्रीवासस्तनुतेसिमस्मैवसरमहरवयुवतीसर्वस्मादपिवोपमार्थेस्याद्रात्रीवसस्तनुत वा
इतितथापिनिगमोभवति॥पुनःसमव्यद्विततंवयंती।समनात्सीत्॥११॥ इंद्रेण

संहिदृक्षसेसंजग्मानोअबिभ्युषा।मंदूसमानवर्चसा।इंद्रेणहिसंदृश्यसेसंगच्छमा
नोबिभ्युषागणेनमंदूमदिष्णूयुवांस्थोपिवामंदुनातेनेतिस्यात्समानवर्चसेत्येतेन
व्याख्यातं॥१२॥ईर्मांतासःसिलिकमध्यमासःसंशूरणासोदिव्यासोअत्याःहंसा
इवश्रेणिशोयतंतेयदाक्षिषुर्दिव्यमज्ममश्वाः॥ईर्मांताःसमीरितांताःसुसमीरितां
ताःपृथ्वंतावासिलिमध्यमाःसंसृतमध्यमाःशीर्षमध्यमावापिवाशिरआदित्यो
भवतियदनुशेतेसर्वाणिभूतानिमध्येचैषांतिष्ठतीदमपीतरच्छिरएतस्मादेवसमाश्रि
तान्येतस्मिन्निंद्रियाणिभवंति।संशूरणासोदिव्यासोअत्याः।शूरःशवतेर्गतिकर्मणो
दिव्यादिविजाअत्याअतनाः।हंसाइवश्रेणिशोयतंते।हंसाहंतेर्घ्नंत्यध्वानंश्रेणि
शइतिश्रेणिःश्रयतेःसमाश्रिताभवंतियदाक्षिषुर्यदापन्दिव्यमज्ममजनिमाजि
मश्वाअस्त्यादित्यस्त्वतिरश्वस्यादित्यादश्वोनिस्तष्टइति।सूरादश्वंवसवोनिरतष्टेत्य

नि॰ पू॰ पिनिगमोभवति ।।१३।। कायमानोवनात्वंयन्मातॄरजगन्नपः। नतत्तेअग्नेप्रमृषेनिवर्त
नंयद्दूरेसन्निहाभवः। कायमानश्चायमानः कामयमानइतिवावनानित्वंयन्मातॄरपोगम
उपशाम्यं। नतत्तेअग्नेप्रमृषेनिवर्तनंयद्दूरेसन्निहाभवसिजायमानः लोधंनयंतिपशुमन्य ते
मानाः। लुब्धमृषिंनयंतिपशुंमन्यमानाः। शीरंपावकशोचिषं। पावकदीप्तिं। अनुशायि
नमितिवाशिनमितिवा।।१४।। कनीनकेवविद्रधेनवेद्रुपदेअर्भके। बभ्रूयामेषुशोभेते।। अ
कनीनकेकन्यकेकन्याकमनीयाभवतिक्वेयंनेतव्येतिवाकमनेनानीयतइतिवाकनतेर्वा
स्यात्कांतिकर्मणः कन्ययोरधिष्ठानप्रवचनानिसप्तम्याएकवचनानीतिशाकपूणिर्वि
द्रधयोर्दारुपादयोर्दारुदृणातेर्वाद्रुपातेर्वातस्माद्द्रुदुनवेनवजातेअर्भकेअवृद्धेते
यथातदधिष्ठानेषुशोभेतेएवंबभ्रूयामेषुशोभेते। बभ्र्वोरश्वयोः संस्तवइदंचमे ३२
दादिदंचमेदादित्यृषिःप्रसंख्यायाह। सुवास्त्वाअधितुग्वनि। सुवास्तुर्नदी। तुग्वती

क्षीमहिपित्र्यस्येवधनस्यप्रवर्धयचनआयूंषिसोमराजन्। अहानीवसूर्योवासराणि
।वासराणिवेसराणि विवासनानिगमनानीतिवाकुरुतनेत्यनर्थकाउपजनाभवंतिक
र्तन हंतन यातनेति जठरमुदरंभवतिजग्धमस्मिन्ध्रियतेधीयतेवा।।७।। मरुत्वांइन्द्रवृष
भोरणायपिबासोममनुष्वधंमदाय। आसिंचस्वजठरेमध्वऊर्मिंत्वंराजासिप्रदिवः
सुतानां।। मरुत्वानिंद्रमरुद्भिस्तद्वान्वृषभोवर्षितापांरणायरमणीयायसंग्रामायपि
बसोममनुष्वधमन्वन्नंमदायमदनीयायजैत्राय। सिंचस्वजठरेमधुनऊर्मिंमधुसो न
ममित्यौपमिकंमाद्यतेरिदमपीतरन्माध्वेतस्मादेवत्वंराजासिपूर्वेष्वप्यहःसुसुतानां
।।८।। तित्तउपरिपवनंभवतिततवद्वातुन्नवद्वातिलमात्रतुन्नमितिवा।।९।। सक्तु
मिवतितउनापुनंतोयत्रधीरामनसावाचमक्रत। अत्रासखायःसख्यानिजानते
भद्रैषांलक्ष्मीर्निहिताधिवाचि। सक्तुमिवपरिपवनेनपुनंतः सक्तुः सचतेर्दुर्धावोभ

तुग्वतीर्थेभवतितत्पूर्णमेतदायंति।कुविन्नंसंतेमरुतःपुनर्नः।पुनर्नोनमंतेमरुतोनसं
तइत्युपरिष्टाद्व्याख्यामः।येतेमदाआहनसोविहायसस्तेभिरिंद्रचोदयदातवेमघं।
येतेमदाआहननवंतोवचनवंतस्तेभिरिंद्रचोदयदानायमघं।।१५।।उपोअदर्शिशुंध्यु
वोनवक्षोनोधाइवाविरकृतप्रियाणि।अद्मसन्नससतोबोधयंतीशश्वत्तमागात्पु
नरेयुषीणां।।उपादर्शिशुंध्युवःशुंध्युरादित्योभवतिशोधनात्तस्यैववक्षोभासाध्यू
ढमिदमपीतरद्वक्ष एतस्मादेवाध्यूढंकायेशकुनिरपिशुंध्युरुच्यते।शोधनादे
वोदकचरोभवत्यापोपिशुंध्युवउच्यंतेशोधनान्नोधाऋषिर्भवतिनवनंदधातिसय
थास्कल्याकामानाविष्कुरुतएवमुषारूपाण्याविष्कुरुतेद्मसद्मानंभवत्यद्म
सादिनीतिवान्नसानिनीतिवा।ससतोबोधयंतीशश्वत्तमागात्पुनरेयुषीणां।स्वप
तोबोधयंतीशाश्वतिकतमागात्पुनरागामिनीनां।तेवाशीमंतइष्मिणः।इष्मिणि

नि० पू०
३३

नइतिवैषणिनइतिवार्षणिनइतिवावाशीतिवाऽश्नमवास्यतइतिसत्याः।शंसावाध्वर्यो
प्रतिमेगृणीहि।इंद्रायवाहः कृणवावजुष्टं।अभिवहनस्तुतिषिमधिषवणप्रवादांस्तुति
मन्यंतऐंद्रीत्वेवशस्यते।परितक्म्येत्यपरिष्टाद्व्याख्यास्यामः॥१६॥स्फाकितेसृइतेसृते
सृगतेप्रजायामितिवा।स्फाकितेर्माधाउत्यपिनिगमोभवतिदयतिरनेककर्मा।नवेनपू
र्वंदयमानस्यामेत्यपदयाकर्मा।यएकइद्विदयतेवसुइतिदानकर्मावाविभागकर्मावा।
दुर्वर्तुर्भीमोदयतेवनानीतिदहतिकर्मा।दुर्वर्तुर्दुर्वारः।विदद्वसुर्दयमानोविशत्रूनिति
हिंसाकर्मा।इमेसुताइंदवःप्रातरित्वनासजोषसा।पिबतमश्विनातान्।अयंहिवां
मृतयेवंदनायमांवायसोदोषायमानोअबूबुधत॥दयमानइति।नूचिदितिनिपा
तःपुराणनवयोर्नूचेतिच।अद्याचिन्नूचित्तदपोनदीनां।अद्यचपुराचतदेवकर्मन
दीनां।नूचपुराचसदनंरयीणां।अद्यचपुराचसदनंरयीणांरयिरितिधननामराते

नि॰पू॰ वानंचरथायतक्षथुः।युवंच्यवानंसनयंपुराणंयथारथंपुनर्युवानंचरणायततक्षथुर्युवा
प्रयौतीतिकर्माणितक्षतिःकरोतिकर्मारजोरजतेर्ज्योतीरजउच्यतउदकंरजउच्यतेलो
३४ कारजांस्युच्यंतेसृगहनीरजसीउच्येते।रजांसिचित्राविचरंतितन्यवइत्यपिनिगमोभव
तिहरोहरतेर्ज्योतिर्हरउच्यतेउदकंहरउच्यतेलोकाहरांस्युच्यंतेसृगहनीहरसीउ
च्येते।प्रत्यग्नेहरसाहरःशृणीहीत्यपिनिगमोभवति।जुहुरेविचितयंतः।जुहुरेवि
चेतयमानाव्यंतइत्येषानेककर्मापदंदेवस्यनमसाव्यंतइतिपश्यतिकर्मावीहिशूर
पुरोळाशमितिखादतिकर्मावीतंपातंपयसउस्रियायाः।अश्नीतंपिबतंपिबतंप
यसउस्रियायाउस्रियेतिगोनामोस्राविणोस्यांभोगाउस्रेतिच।त्वामिंद्रमतिभिःसु
तेसुनीथासोवसूयवः।गोभिःक्राणाअभ्यर्षतगोभिःकुर्वाणाअभ्यर्षत।आत्वा ३४
सिंचहरिमिंद्रोरुपस्थेवाशीभिस्तक्षताश्मन्मयीभिः।आसिंचहरिंद्रोरुपस्थेद्रुमम

यस्यहरिःसोमोहरितवर्णोयमपीतरोहरिरेतस्मादेववाशीभिस्तक्षताश्मन्मयीभिः
वाशीभिरश्ममयीभिरितिवावाग्भिरितिवा।सशर्द्धदर्योविषुणस्यजंतोर्माशिश्नदेवा
अपिगुर्ऋतंनः।सउत्सहतांयोविषुणस्यजंतोर्विषमस्यमाशिश्नदेवाअब्रह्मचर्याः
शिश्नंश्नथतेः।अपिगुर्ऋतंनःसत्यंवायज्ञंवा॥१९॥आघातागच्छानुत्तरायुगानि
यत्रजामयःकृणवन्नजामि।उपबर्बृहिवृषभायबाहुमन्यमिच्छस्वसुभगेपतिंम
त्॥आगमिष्यंतितान्युत्तराणियुगानियत्रजामयःकरिष्यंत्यजामिकर्माणिजाम्य
तिरेकनामबालिशस्यवासमानजातीयस्यवोपजनउपधेहिवृषभायबाहुमन्यमि
च्छस्वसुभगेपतिंमदितिव्याख्यातं॥२०॥द्यौर्मेपिताजनितानाभिरत्रबंधुर्मेमाता
पृथिवीमहीयं।उत्तानयोश्चम्वो३र्योनिरंतरत्रापितादुहितुर्गर्भमाधात्।द्यौर्मेपि
तापातापालयितावाजनयितानाभिरत्रबंधुर्मेमातापृथिवीमहीयंबंधुःसंबंधनात्।

नि०पू० ३५ ५

भिः सम्नहनान्नाभ्यासन्नेधा गर्भो जायते इत्यस्र उरेतस्मादेव ज्ञातीन्सनाभय इत्याचक्ष
तेसबंधव इति ज्ञातिः संज्ञानात् उत्तानयोश्चम्वो३र्योनिरंतः । उत्तान उत्ततानऊ
र्ध्वतानोवा तत्र पिता दुहितुर्गर्भंदधाति पर्जन्यः पृथिव्याः शंयुः सुखंयुः । अथ यच्छं
योरं रपोदधातन् । रपोरिप्रमिति पापनामनी भवतः शमनं च रोगाणां यावनं च भया
नामथापि शंयुर्बार्हस्पत्य उच्यते ॥ तच्छंयोरावृणीमहे गातुं यज्ञाय गातुं यज्ञपतय इ
त्यपि निगमो भवति गमनं यज्ञाय गमनं यज्ञपतये ॥ २१ ॥ अदितिरदीनादेवमाता ॥
२२ ॥ अदितिर्द्यौरदितिरंतरिक्षमदितिर्माता स पिता स पुत्रः ॥ विश्वेदेवा अदितिः पंच
जना अदितिर्जातमदितिर्जनित्वं ॥ इत्यदितेर्विभूतिमाचष्ट एनान्यदीनानीति वा
यमेरिभ्गवः । एरिरइती निरुपसृष्टोभ्यस्तः ॥ २३ ॥ उत स्मैनं वस्त्रमथिं न तायुमनु
क्रोशंति क्षितयो भरेषु । नीचायमानं जसुरिं न श्येनं श्रवश्चाच्छा पशुमच्च यूथं ॥ अपि ३५

दीनकर्मणः ॥ १७ ॥ विद्याम तस्य ते वयमकूपारस्य दावने । विद्याम तस्य ते वयमकूपारस्य
दानस्यादित्योप्यकूपार उच्यते । कूपारो भवति दूरपारः समुद्रोप्यकूपार उच्यते कूपारो
भवति महापारः कच्छपोप्यकूपार उच्यते कूपारो न कूपमृच्छतीति कच्छपः कच्छं पाति क
च्छेन पातीति वा कच्छेन पिबतीति वा कच्छः खच्छः खच्छदोयमपीतरो नदीकच्छ एतस्मादेव
कमुदकं तेन छाद्यते । शिशीते शृंगे रक्षसे विनिक्षे । निश्यति शृंगे रक्षसो विनिक्षणनाय
रक्षो रक्षितव्यमस्माद्रहसि क्षणोतीति वा रात्रौ नक्षत इति वा । अग्निः सुतुकः सुतुकेभि
रश्वैः । सुतुकनः सुतुकनैरिति वा । सुप्रजो भिरिति वा । सुप्रायणा अस्मिन्यज्ञे विश्रयंतां आः सुप्र
सुभगमनाः ॥ १८ ॥ देवानो यथा सदमिद्वृधे असन्नप्रायुवो रक्षितारो दिवेदिवे ॥ देवानो
यथा सदा वर्धनाय स्युरप्रायुवो प्रमाद्यंतो रक्षितारश्चाहन्यहनि च्यवन ऋषिर्भवति च्या
वयिता स्तोमानां च्यवानमित्यप्यस्य निगमा भवंति । युवं च्यवानं सनयं यथा रथं पुनर्यु

स्मेनंवस्त्रमथिमिववस्त्रमाथिनंवस्त्रंवस्तेःस्मापुरितिस्तेननामसंस्त्यानमस्मिन्पा
पकमितिनैरुक्तास्तस्यैतेर्वास्यादनुक्रोशातिक्षितयःसंग्रामेषुभरइतिसंग्रामनाम
भरतेर्वाहरतेर्वानीचायमानंनीचैरयमानंनीचैर्निचितंभवत्युच्चैरुच्चितंभवति
ऽस्तमिवश्येनंश्येनःशंसनीयंगच्छति।अवश्याच्छापशुमच्चयूथं।अवश्यापिपशु
मच्चयूथंप्रशंसाचयूथंचधनंचयूथंचेतिवायूथंयौतेःसमायुतंभवति।इंधानएनं
जरतेस्वाधीःगृणाति।मंदीमंदतेःस्तुतिकर्मणः।प्रमंदिनेपितुमदर्चतावचः।प्रा
र्चतमंदिनेपितुमदित्यृचोगौर्व्याख्यातः॥२४॥अत्राहगोरमन्वतनामत्वष्टुरपीच्यं
इत्थाचंद्रमसोगृहे।अत्रहगोःसममंसतादित्यरश्मयःस्वंनामापीच्यमपगत
मपचितमपिहितमंतर्हितंवामुत्रचंद्रमसोगृहेगातुर्व्याख्यातःशतुद्रूपवक्तु
षसोजनायेत्यपिनिगमोभवतिदंसयःकर्माणिदंसयंत्येनानि।कुत्सस्यमन्म

नि०पू० नह्यस्य दंसयइत्यपि निगमोभवति। सत्तुतावनेनमश्नोत्यंहातिः। सतुतावनेनमंश्नोत्यंह हरिः
३६ तिश्चांहश्चांहुश्चहंतेर्निरूढोप[illegible]धाद्विपरीतात्। बृहस्पतेचयसइत्यपियाकं। बृहस्पते
यज्ञातयासिदेवपीकंपीयतिर्हिंसाकर्मा विस्रुतेद्यावापृथिव्योर्वियवनात्। समान्यावि
युतेदूरेअंते। समानंसंमानमात्रंभवतिमात्रामानाद्दूरंव्याख्यातमंतोतते। ऋधगिति
पृथक्भावस्यप्रवचनंभवत्यथाप्यृध्नोत्यर्थेदृश्यते। ऋधगयाऋधगुताशमिष्ठाः
ऋधुवन्नयाक्षीऋधग्वन्नाशमिष्ठाइतिचास्याइतिचास्येतिचोदात्तंप्रथमादेशेनु
दात्तमन्वादेशेतीव्रार्थतरमुदात्तमल्पीयोर्थतरमनुदात्तं। अस्याउषुणउपसातयेभु
वोहेळमानोरररिवांअजाश्वश्रवस्यतामजाश्व। अस्मैनःसातयउपभुवाहेळमा
नोक्रुध्यन्नरिवानातिरभ्यस्तोजाश्वेतिपूषणमाह। अजाश्वाअजाअजनाअथाप्युदा ३६
त्तं। दीर्घायुरस्यायःपतिर्जीवातुशरदःशतं। दीर्घायुरस्यायःपतिर्जीवतुसशरदः

नि०द०
३८
भिसन्नामात्संवत्सरः प्रधान उत्तरोर्धर्चोस्मिन्नाभिचक्रं त्यृतुः संवत्सरो ग्रीष्मो वर्षा हेमं
त इति संवत्सरः संवसंतेस्मिन्भूतानि ग्रीष्मो ग्रस्यंतेस्मिन्रसा वर्षा वर्षत्यासु पर्जन्यो हेमं
तो हिमवान् हिमं पुनर्हंतेर्वा हिनोतेर्वा जरमजरणधर्माणमनर्वमप्रत्यृतमन्यस्मिन्नत्रे
मा निसर्वाणि भूतान्यभिसंतिष्ठंते तं संवत्सरं सर्वमात्राभिः स्तौति पंचारे चक्रे परिवर्त
मान इति पंचर्तुतया पंचर्तवः संवत्सरस्येति च ब्राह्मणं हेमंतशिशिरयोः समासेन षड
र आहुरर्पितमिति षडृतुतया राः प्रत्यृता नाभौ षट् पुनः सह ते ः द्वादशारं नहि
तज्जराय । द्वादश प्रधयश्चक्रमेकमिति मासानां मासा मानात्प्रधिः प्रहितो भवति
तस्मिन्त्साकं त्रिंशता न शंकवोर्पिताः षष्टिर्न चलाचलासः । षष्टिश्च ह वै त्रीणि च श
तानि संवत्सरस्याहोरात्रा इति च ब्राह्मणं समासेन सप्तशतानि विंशतिश्च तस्थुः । ३८
सप्त च वै शतानि विंशतिश्च संवत्सराहोरात्रा इति च ब्राह्मणं विभागेन विभागेन ॥२७॥

एकार्थ एकोनुवयः सुपर्णा यद्दिंद्र जष्टो दम्ना संमात पंती षिरेणमरुत्वां तित उ
स कुं भिवतत्स्व र्यस्यं इंद्रेण सम मींतासः कायमानः कनीनके वा पो अदर्शि सुवितेवि
द्यामदेवान आद्यद्यो र्मे दितिरदितिरुतस्मात्त्राहास्य वामस्य सप्त युंजंति सप्तविंश
ति ः॥२७॥ ॥ इति निरुक्ते चतुर्थोध्यायः ॥ ४ ॥ ॥ हरिः ॐ ॥ सस्निमविंदच्चरणेन
दीनां । सस्नातं मेघं । वाहिष्ठो वाहयितृतमो वो हूतो ऊर्वम्नरा । वो ह्स्ति तमो ह्वाता नाना स्तो
मो ह्वृतो ऊर्वन्नरो नरा मनुष्या नृत्यंति कर्मसु ह्वृतो जवते र्वा ह्वयते र्वा वारयते र्वा ॥ ह्व
ता देवानामसि मर्त्यानामित्यपि निगमो भवति वा वशानो वष्टे र्वा वाश्यते र्वा । सप्तस्व
सृ ररुषी र्वावशानं इत्यपि निगमो भवति वार्यं वृणोते स्तथापि वरतमं ॥ तद्वार्यं वृण
महे वरिष्ठं गोपयत्यं । तद्वार्यं वृणीमहे वर्षिष्ठं गोपायितव्यं गोपायितारो यूयं स्थ युष्म
भ्यमिति वा धइत्यन्ननामाध्यानीयं भवति । आमंत्रेभिः सिंचतामद्यमंधः । आसिंच

नि० पू० ३८ तामत्रैर्मदनीयमधोमत्रं पात्रममास्मिन्नदंत्यमा पुनर्निर्मितं भवति पात्रं पाना
त्तमोयंधत्त उच्यतेनास्मिन्ध्यानंभवतिनदर्शनमधंतमइत्यभिभाषंतेयमपीतरोधएत
स्मादेवपश्यदृक्षुणवान्नविनेतदंधइत्यपिनिगमोभवति ।।१।। नयस्यद्यावापृथिवीनध
न्वनांतरिक्षंनाद्रयःसोमोअक्षाः। अस्यैतेरित्येके। अनुगामानोभिरक्षाःसोमोदु पे
ग्धाभिरक्षाः। लोपाशःसिंहंप्रत्यंचमत्साः। क्षियतिनिगमःपूर्वःक्षरतिगमउत्तरइत्ये
केन्नपोमानोभिर्यदाक्षियत्यथसोमोदुग्धाभ्यःक्षरतिसर्वेक्षियतिनिगमाइतिशा
कपूणिःश्वात्रमितिक्षिप्रनामाशुअतनंभवति।। सपतत्रीत्वरंस्थाजगद्यच्छ्वात्रमग्निर
त कृणोज्जातवेदाः। सपतत्रिचेत्वरंस्थावरंजंगमंचयत्तत्क्षिप्रमग्निरकरोज्जातवेदाइति
रवनात्। आत्वारथंयथोतयइत्यपिनिगमोभवति हासमानेइत्युपरिष्टाद्व्याख्यास्या ३८
मो। वम्रकःपड्भिरुपसर्पदिंद्रं पानेरितिवास्याशनेरितिवास्पर्शनेरितिवा। ससन्न

शतंशरद्गृहात्सस्यामोषधयोभवंतिशीर्णा आपइतिवास्येत्यस्याइत्येतेनव्याख्यातं।।
२५।। अस्यवामस्यपलितस्यहोतुस्तस्यभ्रातामध्यमोअस्त्यश्नः।। तृतीयोभ्राताघृ
तपृष्ठोअस्यात्रापश्यंविश्पतिंसप्तपुत्रं।। अस्यवामस्यवननीयस्यपलितस्यपालयि
तुर्होतुर्ह्वातव्यस्यतस्यभ्रातामध्यमोअस्त्यशनोभ्राताभरतेर्हरतिकर्मणोहरतेर्भा
गंभर्तव्योभवतीतिवातृतीयोभ्राताघृतपृष्ठोस्यायमग्निस्तत्रापश्यंसर्वस्यपातारंवा सं
पालयितारंवाविश्पतिंसप्तपुत्रंसप्तमपुत्रंसर्पणपुत्रमितिवा सप्तसृप्ताख्यासप्ता
दित्यरश्मयइतिवदंति।।२६।। सप्तयुंजंतिरथमेकचक्रमेकोअश्वोवहतिसप्तनामा।।
त्रिनाभिचक्रमजरमनर्वंयत्रेमाविश्वाभुवनाधितस्थुः। सप्तयुंजंतिरथमेकचक्रे
मेकचारिणंचक्रंचकतेर्वाचरतेर्वाक्रामतेर्वाएकोश्वोवहतिसप्तनामादित्यःसप्तास्मै
रश्मयोरसानभिसन्नामयंतिसप्तैनमृषयःस्तुवंतीतिवेदमपीतरन्नामैतस्मादेवा

नि॰ पू॰ यं॥अन्येनमदहनोगछक्षिप्रमाहस्मेवभाषमाणेत्यसभ्यभाषणादाहनाइवभवत्येतस्मादाह
३९ नस्यादृषिर्निर्दाहोभवतिनिर्दहतेःक्षयतिकर्मणः।नदस्यमारुधतःकामआगंन्।नदनस्यमारुध
तःकाममागमत्संरुधप्रजननस्यब्रह्मचारिणइत्यृषिपुत्र्याविलपितंवेदयंते॥२॥४॥ वरा
होमेघोभवतिवराहारः।विध्यद्वराहंतिरोअद्रिमस्तेत्यपिनिगमोभवत्ययमपीतरोवरा
हएतस्मादेववरमाहारमाहार्षीरितिचब्राह्मणंबृहतिमूलानिवरंवरंमूलंबृहतीतिवा॥
वराहमिंद्रएमुषमित्यपिनिगमोभवत्यंगिरसोपिवराहाउच्यंते।ब्रह्मणस्पतिर्वृषभिर्वरा
हैः।यथाप्येतेमाध्यमकादेवगणावराहवउच्यंते॥पश्यन्हिरण्यचक्रानयोदंष्ट्रान्विध
वतोवराहून्।स्वराराण्यहानिभवंतिस्वयंसारीण्यपिवास्वरादित्योभवतिसएनानिसा
रयति।उस्राइवस्वसराणीत्यपिनिगमोभवतिशर्याअंगुलयोभवंतिशर्याइषवःश ३९
रमय्यःशरःशृणातेः।शर्याभिर्नभरमाणोगभस्त्योरित्यपिनिगमोभवत्यर्कोदेवोभवति

पक्कमविद्रहुर्चंतं । स्वपनमेतन्माध्यमिकं ज्योतिरनित्यदर्शनं तद्दिवा विद्द्ज्ञात्वल्य
मानं । द्विता श्रुसत्त्वा स्वधया च शंभुः । द्वैधं सत्त्वा मध्यमे च स्थान उत्तमे च शंभुः सुख
भूः । मृगं न व्रा मृगयंते । मृगमिव व्रात्या प्रैषाः ॥ ३ ॥ x असश्चंती भूरिधारे पयस्वती ।
असज्यमाने इति वा । व्युदस्यंत्याविति वा बहुधारे उदकवत्यो वनुष्यतिर्हंतिकर्मान
वगतसंस्कारो भवति वनुयाम वनुष्यत इत्यपि निगमो भवति । दीर्घप्रयज्युमति
यो वनुष्यति वयं जयेम पृतनासु दूढ्यः । दीर्घप्रततयज्ञमभिजिघांसति यो वयं तं
जयेम पृतनासु दूढ्यो दुर्धियं पापधियं पापः पाता पेयानां पापत्यमानो वाऽवप
तती तिवा पापत्यते वा स्यात्तरुष्यतिरप्येवंकर्मा । इंद्रेण युजा तरुषेम वृत्रमित्यपि
निगमो भवति भंदना भंदतेः स्तुतिकर्मणः । पुरु प्रियो भंदते धामभिः कविरित्य
पि निगमो भवति स भंदना उदियर्ति प्रजावतीरिति च । अन्ध्येनमदोहनोयाहित्व

ख्यातोथाप्यर्थेदृश्यते।अम्भृणः अपः।अन्नेजा अपः।अपो अन्वधीतिद्युम्नंयोततेर्यशोवान्नंवा।अस्मेद्युम्नमधिरत्नंचधेहि।अस्मासुद्युम्नंचरत्नंचधेहि॥५॥पवित्रंपुना
तेर्मन्त्रः पवित्रउच्यते।येनदेवाःपवित्रेणात्मानंपुनतेसदेत्यपिनिगमोभवतिरश्मयःप
वित्रउच्यंते।गभस्तिपूतोनृभिरद्रिभिःसुतइत्यपिनिगमोभवत्यापःपवित्रउच्यते।शत
पवित्राःस्वधयामदंतीर्बहूदकाः।अग्निःपवित्रमुच्यतेवायुःपवित्रमुच्यतेसोमःपवित्रमु
च्यतेसूर्यःपवित्रमुच्यतइंद्रःपवित्रमुच्यते।अग्निःपवित्रंसमापुनातुवायुःसोमःसू
र्यइंद्रःपवित्रंतेमापुनंत्वपिनिगमोभवतितोदस्तुद्यतेः॥६॥पुरुत्वादाश्वान्वोचेरिरग्ने
तवस्विदा।तोदस्येवशरणआमहस्य।बहुदाश्वांस्त्वामेवाभिह्वयाम्यरिरमित्रऋ
च्छतेरीश्वरोप्यरिरेतस्मादेवयदन्यदेवत्याअग्नावाहुतयोहूयंतइत्येतद्दृष्ट्वैवमवक्ष्यत्। ४०
तोदस्येवशरणआमहस्य।तुदस्येवशरणेधिमहतःस्वञ्चाःसुअञ्चनः।आज्यंघृ

तद्धृष्ठस्त्वंचाइत्यपिनिगमोभवतिशिपिविष्टोविष्णुरितिविष्णोर्द्वेनामनीभवतः कुत्सिता
र्थीयंपूर्वंभवतीत्यौपमन्यवः।७॥किमित्तेविष्णोपरिचक्ष्यंभूत्प्रयद्ववक्षेशिपिविष्टोअ
स्मि।मावर्पोअस्मदपगूहएतद्यदन्यरूपःसमिथेबभूथ॥किंतेविष्णोप्रख्यातमेतद्भव
त्यप्रख्यापनीयंयन्नःप्रब्रूषेशेपइवनिर्वेष्टितोस्मीत्यप्रतिपन्नरश्मिरपिवाप्रशंसानामै
वाभिप्रेतंस्यात्किंतेविष्णोप्रख्यातमेतद्भवतिप्रख्यापनीयंयदुतप्रब्रूषेशिपिविष्टोस्मी
तिप्रतिपन्नरश्मिःशिपयोत्ररश्मयउच्यंतेतैराविष्टोभवति।मावर्पोअस्मदपगूहएतत्।
।वर्पइतिरूपनामवृणोतीतिसतोयदन्यरूपःसमिथेसंग्रामेभवसिसंयतरश्मिस्तस्यो
त्तराभूयसेनिर्वचनाय॥८॥प्रतत्तेअद्यशिपिविष्टनामार्यःशंसामिवयुनानिविद्वा
न्।तंत्वागृणामितवसमतव्यान्क्षयंतमस्यरजसःपराके।प्रतत्तेअद्यशिपिविष्टनामा
र्यःशंसाम्यर्योहमस्मीश्वरस्तोमानामर्यस्त्वमसीतिवातंत्वास्तौमितवसमतव्यास्तवस

नि० ५० ५१

इतिमहतोनामधेयमुदितोभवतिनिवसंतमस्यरजसःपराकेपराक्रांतेअघृणिरागतहदीत्रिःआ
घृणेसंसचावहै।आगतहमेसंसेवावहै।पृथुज्रयाःपृथुजवःपृथुज्रयाअमिनादायुर्दस्योः
प्रामापयदायुर्दस्योः।९।अग्निंनरोदीधितिभिररण्योर्हस्तच्युतीजनयंतप्रशस्तं।दूरेदृशंगृ
हपतिमथर्युं।दीधयःतयोगुलयोभवतिधीयंतेकर्मसुरणीप्रत्यृतएनेअग्निःसमरणाज्जा
यतइतिवाहस्तच्युतीहस्तप्रच्युत्याजनयंतप्रशस्तंदूरेदर्शनंगृहपतिमतनवंतं।१०।एक
याप्रतिधापिबत्साकंसरांसित्रिंशतं।इंद्रःसोमस्यकाणुका।एकेनप्रतिधानेनापिबत्सा
कंसहेत्यर्थःइंद्रःसोमस्यकाणुकाकांतकानीतिवाक्रांतकानीतिवाकृतकानीतिवेंद्रःसो
मस्यकांतइतिवाकणेघातइतिवाकणेहतःकांतिहतस्तत्रैवघ्नाज्ञिकावेदयंतेत्रिंशदुक्थ
पात्राणिमाध्यंदिनेसवनएकदेवतानितान्येतस्मिन्कालएकेनप्रतिधानेनपिबंतितान्य
त्रसरांस्युच्यंतेत्रिंशदपरपक्षस्याहोरात्रास्त्रिंशत्पूर्वपक्षस्येतिनैरुक्तास्तद्याएताश्चांद्र ५१

पदेनमःचेंत्यर्कमित्रोभवतियदेनोनार्चंत्यर्कमन्नंभवत्यर्चतिभूतान्यर्कोवृक्षोभवतिस
वृतःकटुकिम्ना।४।गायंतित्वागायत्रिणोर्चंत्यर्कमर्किणः।ब्रह्माणस्त्वाशतक्रतउद्वंश
मिवयेमिरे।गायंतित्वागायत्रिणोर्चंत्यर्कमर्किणोब्रह्माणस्त्वाशतक्रतउद्येमिरेवंशमि
ववंशोवनशयोभवतिवननाच्छ्रूयतइतिवापर्वीरथेनिर्भवतियद्विपुनातिभूमिं।तूनप्
व्यारथेन।मर्हिभिंद्रंत्योजसा।तंमरुतःक्षुरपविनाव्ययुरित्यपिनिगमोभवतोवक्ष्
व्याख्यातंधन्वांतरिक्षंधन्वंत्यस्मादापस्तिरोधन्वातिरोन्वतइत्यपिनिगमोभवतिसि
नमन्नंभवतिसिनातिभूतानि।येनस्मासिनंभरथःसखिभ्यइत्यपिनिगमोभवतीत्
थामुथेत्येतेनव्याख्यातंसचासहेत्यर्थः।वसुभिःसचाभुवा।वसुभिःसहभुवो
विदितिनिपातोनुदात्तःपुरस्तादेवव्याख्यातस्थापिपृशुनामेहभवत्युदात्तश्चिदसि
मनासिचितास्त्वयिभोगाश्चेतयसइतिवा।आइत्याकारउपसर्गःपुरस्तादेवव्या।

मस्यआगामिन्यआपोन्वेकंपिबंतिरश्मयस्तमपरपक्षेपिबंतितथापिनिगमोभवतियमक्षित
माक्षितयःपिबंतीतितंपूर्वपक्षआप्याययंतितथापिनिगमोभवतियथादेवाअंशुमाप्याय
यंतीत्यध्रिगुर्मंत्रोभवतिगव्यधिकृतत्वादपिवाप्रशासनमेवाभिप्रेतंस्यात्तच्छब्दवत्त्वाद
ध्रिगोशमीध्वंसुशमिशमीध्वंशमीध्वमध्रिगवित्यग्निरप्यध्रिगुरुच्यते।तुभ्यंश्चोतंत्य
ध्रिगोशचीवः।अधृतगमनकर्मवज्रिन्निंद्रोप्यध्रिगुरुच्यते।अध्रिगवओहमिंद्रायेत्यपिनि
गमोभवत्यांगूषस्तोमआघोषः।एनांगूषेणवयमिंद्रवंतः।अनेनस्तोमेनवयमिंद्र
वंतः।११।आपांतमन्युस्तृपलप्रभर्माधुनिःशिमीवाञ्छरुमांऋजीषी।सोमोविश्वा
न्यतसावनानिनार्वागिंद्रंप्रतिमानानिदेभुः।आपातितमन्युस्तृप्रप्रहारीक्षिप्रप्रहा
रीसोमोवेंद्रोवाधुनिर्धूनोतेःशिमीतिकर्मनामशमयतेर्वाशक्नोतेर्वाऋजीषीसोमोयत्सो
मस्यपूयमानस्यातिरिच्यतेतदृजीषमपार्जितंभवतितेनर्जीषीसोमोथाप्यैंद्रोनि

नि० पू०
४२

गमो भवत्यृजीषी वज्रीति हर्योरस्य स भागो धानाश्चेति धाना भ्राष्ट्रे हिता भवंति फले हिता
भवंतीति वा बब्धांते हरी धाना उप ऋजीषं जिघ्रतामित्यपि निगमो भवत्यादिनाभ्यासे
नोपहितेनोपधामदत्ते बभस्तिरत्तिकर्मा सोमः सर्वाण्युत्तमानि वनानि नार्वा गिंड्रभ्राते
मानानिदभ्नुवंति यऽरेनं भ्रातिमिमते नैनं तानि दभ्नुवंत्यर्वागेवैनमप्राप्य विनश्यंतीतीड्म
धनेत्येकेने घटुकं सोमकर्मो भिनयग्रधानेत्यपरं श्मशारु अश्नुत इति वा श्माश्नुत इति वा
।अवश्मशारुधहाः ।अवारुध ध्मशावा रिति ॥१२॥ उर्वश्यप्सरा उर्वभ्यश्नुते उरुभ्याम
श्नुत उरुर्वा वशोऽस्या अप्सरा अप्सारिण्यपि वाप्स इति रूपनामाप्सातेरप्सानीयं भवत्या
दर्शनीयं व्यापनीयं वा स्पष्टं दर्शनायेति शाकपूणिर्यदप्स इत्यभक्षस्याप्सो नामेति व्या
पिनस्तद्राभवतिरूपवती तदनयात्तमिति वा तदस्यै दत्तमिति वा तस्या दर्शनान्मित्रावरु
णयो रेतश्चस्कंद तदभिवादिन्येषर्ग्भवति ।१३। उतासि मैत्रावरुणो वसिष्ठोर्वश्या ब्र ४२

जोषाइत्यपिनिगमोभवत्यध्रयाणोध्रीतयानः।अतुध्रुयाकृणुत्यध्रयाणेत्यपिनिगमो
भवति।हरयाणोहरमाणयानः।रजतंहरयाणइत्यपिनिगमोभवति।यआरितःकर्म
णिकर्मणिस्थिरः।प्रत्यृतस्तोमान्।व्रन्दीव्रन्दतेर्मृदूभावकर्मणः॥१५॥नियद्वृणक्षिश्वस
नस्यमूर्धनिशुष्णस्यचिद्व्रन्दिनोरोरुवद्वना॥नियद्वृणक्षिश्वसनस्यमूर्धनिशब्दका
रिणःशुष्णस्यादित्यस्यचशोषयितूरोरूयमाणोवनानीतिवावधेनेतिवा।अव्रदंत्यृ
क्षितेत्यपिनिगमोभवति।वीळुपातिर्व्रीडयतिश्चसंस्तंभकर्माणौपूर्वेणास्तंप्रसुज्य
तिनिःष्षपीस्त्रीकामोभवतिविनिर्गतपसाःपसःसपतेःस्पृशतिकर्मणः।मानोम
घेवनिष्षपीपरादाः।सयथाधनानिविनाशयतिमानस्त्वंतथापरादाः।तूर्णाशमु
दकंभवति।तूर्णमश्नुते।तूर्णाशंनगिरेरधीत्यपिनिगमोभवति।क्षुम्पमहिछत्रकंभ ४३
वतियत्क्षुम्प्यते॥१६॥कुदामर्तमराधसंपदाक्षुम्पमिवस्फुरत्।कदानःशुश्रवद्गिरइं

द्रोअंग।कदामर्तमराधसंपादेनक्षुम्पमिवावस्फुरिष्यतिकदानेःश्रोष्यतिचगिरइंद्रो
अंगअंगेतिक्षिप्रनामांचितमेवांकितंभवति।निचुंपुणःसोमोनिचान्तपृणोनिचमनेन
प्रीणाति॥१७॥पत्नीवन्तःसुताइमउशन्तोयंतिवीतये।अपांजग्मिर्निचुंपुणः।पत्नी
वन्तःसुताइमेऽद्भिःसोमाःकामयमानायंतिवीतयेपानायापांगंतानिचुंपुणःसमुद्रोपि
निचुंपुणउच्यतेनिचमनेनपूर्यतेवभृथोपिनिचुंपुणउच्यतेनीचैरस्मिन्क्वणन्तिनीचै
र्दधतीतिवा।अवभृथनिचुंपुणेत्यपिनिगमोभवतिनिचुंपुणनिचंकुणेतिचपदिर्ग
न्तुर्भवतियत्पद्यते॥१८॥सुगुरसत्सुहिरण्यःस्वश्वोबृहदस्मैवयइन्द्रोदधाति।यस्त्वा
यन्तंवसुनाप्रातरित्वोमुक्षीजयेवपदिमुत्सिनाति।सुगुर्भवतिसुहिरण्यःस्वश्वो
महच्चास्मैवयइन्द्रोदधातियस्त्वायंतमन्नेनप्रातरागामिन्नतिथे।मुक्षीजयेवपदि
मुत्सिनाति।कुमारोमुक्षीजामोचनाच्चसयनाच्चततनाच्चपादःपद्यतेः।आविस्वः

क्षिपुते गृह्णते बृबुं सं सं पादुरस्य निर्णिजो न मुच्यते। आविः कुरुते भासमादित्यं गृह्णते बृबुस
बुसमित्युदकनामब्रवीतेः शब्दकर्मणो भ्रंसतेर्वा यद्वर्षन्पातयत्युदकं रश्मिभिस्तत्प्रत्या
दत्ते॥१९॥ वृकश्चंद्रमा भवति विवृतज्योतिष्को वा विकृतज्योतिष्को वा विक्रांतज्योति
ष्को वा॥२०॥ अरुणो मासकृद्वृकः पथा यंतं ददर्श हि। उज्जिहीते निचाय्या तष्टेव पृ
ष्ठ्यामयी वित्तं मे अस्य रोदसी॥ अरुण आरोचनो [illegible]हि मासकृन्मासानां चार्धमा
सानां च कर्ता भवति चंद्रमा वृकः पथा यंतं ददर्श नक्षत्रगणमभिजिहीते निचाय्य येन य
नयोक्ष्यमाणो भवति चंद्रमास्तक्ष्युवन्निव पृष्ठरोगी जानीतं मे अस्य द्यावापृथिव्या
वादित्योपि वृक उच्यते यदावृंक्ते। अजोहवीदश्विना वर्तिका वामास्नो यत्सीममुंच
तं वृकस्य। आह्वयदुषा अश्विनावादित्येनाभिग्रस्तां तामश्विनौ प्रमुमुचतुरित्याख्या
नं श्वापि वृक उच्यते विकर्तनात्॥ वृकश्चिदस्य वारण उरामथिः। उरणमथिः। उरण ऊर्ण ४४

सन्मनसोधिजातः द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वे देवाः पुष्करे त्वाददंत। अथास्मि मैत्राव
रुणो वसिष्ठो वश्या ब्रह्मन्मनसोधिजातो द्रप्सं स्कन्नं ब्रह्मणा दैव्येन द्रप्सः संभृतप्सानी
यो भवति सर्वे देवाः पुष्करे त्वा धारयंत पुष्करमंतरिक्षं पोषति भूतान्युदकं पुष्करं पूजाक
र्म पूजयितव्यमिदमपीतरत्पुष्करमेतस्मादेव पुष्करं वपुष्करं वा। पुष्पं पुष्यतेर्वयुनं वेतेः
कांतिर्वा प्रज्ञा वा॥१४॥ स इत्तमो वयुनं ततन्वत्सूर्येण वयुनवच्चकार। स तमः प्रज्ञानं तत
न्वत्सनं सूर्येण प्रज्ञानवच्चकार वाजपस्त्यं वाजपतनं। सनेम वाजपस्त्यमित्यपि निगमो
भवति वाजगंध्यं गध्युत्तरपदं। अश्याम वाजगंध्यमित्यपि निगमो भवति गध्यं गृह्णातेः
ऋज्रा वाजं न गध्ययुं युषन्नित्यपि निगमो भवति गध्यतिर्मिश्रीभावकर्मा। आग
धिता परिगधितेत्यपि निगमो भवति कौरयाणः कृतयानः। पाकस्थामा कौरयाण इत्य
पि निगमो भवति तौरयाणस्तूर्णयानः। स तौरयाण उप याहि यज्ञं मरुद्भिरिंद्र सखिभिः स

वान्भवति। ऊर्णा पुनर्वृणोतेरूर्णोतेर्वा। वृकवाशिन्यपि वृकीत्युच्यते॥ शतं मेषान्वृक्ये चक्ष
दानमृज्राश्वं तं पितान्धं चकारेत्यपि निगमो भवति जोषवाकमित्यविज्ञातनामधेयं जो
षयितव्यं भवति॥ २१॥ य इन्द्राग्नी सुतेषु वां स्तवत्तेष्वृतावृधा। जोषवाकं वदतः पज्रहो
षिणा न देवा भसथश्चन। य इन्द्राग्नी सुतेषु वां सोमेषु स्तौति तस्याश्नीथोऽथ योऽयं जोष
वाकं वदति विजञ्जपः प्रार्जितहोषिणौ न देवौ तस्याश्नीथः। कृत्तिः कृन्ततेर्यशो वान्नं
वा। महीव कृत्तिः शरणा त इन्द्र। सुमहत्त इन्द्र शरणमन्तरिक्षे कृत्तिरिवेतीयमपीतरा कृत्ति
रेतस्मादेव सूत्रमय्युपमार्थे वा। कृत्तिं वसान आ चर पिनाकं बिभ्रदागहीत्यपि निग
मो भवति श्वघ्नी कितवो भवति स्वं हन्ति स्वं पुनराश्रितं भवति। कृतं न श्वघ्नी विचिनो
ति देवने। कृतमिव श्वघ्नी विचिनोति देवने कितवः किं तवास्तीति शब्दानुकृतिः कृतवा
न्वाशीर्नामकः समामिति परिग्रहार्थीयं सर्वनामानुदात्तं॥ २२॥ मा नः समस्य दूढ्यः

नि॰ पू॰
८५ परि द्वेषसो अंहतिः। ऊर्मिर्न नावमा वधीत्॥ मा नः सर्वस्य दुर्धियः पापधियः सर्वतो द्वे
षसोंहतिरूर्मिरिव नावमावधीत्। ऊर्मिरूर्णोतेर्नौः प्रणोत्तव्या भवति नमतेर्वा तत्कथमनु
दात्तप्रकृति नाम स्याद्दृष्टव्ययं तु भवत्युतो समस्मिन्ना शिशीहि नो वसो इति सप्तम्यां
शिशीतिर्दानकर्मा रूष्पाणो अघायतः समस्मादिति पंचम्यां रुष्यती रक्षाकर्माथापि
प्रथमाबहुवचने। नभंतामन्यके समे ॥२३॥ हविषा जारो अपां पिपर्ति पपुरिर्नरा। पिता
कुटस्य चर्षणिः। हविषा पां जरयिता पिपर्ति पपुरिरिति तद्द्वयोर्णाति निगमो वा प्रीणाति निगमो
वा पिता कृतस्य कर्मणश्चायिता दित्यः शंब इति वज्रनाम शमयतेर्वा शातयतेर्वा उग्रो य
शंबः पुरुहूत तेनेत्यपि निगमो भवति केपयः कपूया भवंति कपूयमिति पुनाति कर्म
कुत्सितं दुष्पूयं भवति ॥२४॥ पृथक्प्रायन्प्रथमा देवहूतयो कृण्वतः श्रवस्यानि दुष्टरा। ५५
न ये शेकुर्यज्ञियां नावमारुहमीर्मैव ते न्यविशंत केपयः। पृथक्प्रायन्पृथक्प्रथते प्रथमा

नि० पू० तेर्विकुषितोभवत्ययमपीतरःकोशएतस्मादेवसंचयआचितमात्रोमहान्भवति।सिंचत
८६ न्तपाणंनरपाणंदपकर्मणासंग्रामस्तुपमिमीतिकाकुदंतालिव्याचक्षतेजिह्वाकोकुवासास्मि
न्धीयतेजिह्वाकोकुवाकोकूयमानावर्णान्नुदतीतिवाकोकूयतेर्वास्याच्छब्दकर्मणोजिह्वा
जोहुवातालुतरतेस्तीर्णतममंगंलततेर्वास्याद्विपरीताद्यथातलंलतेत्यविपर्ययः॥२६
य सुदेवोअसिवरुणयस्यतेसप्तसिंधवः।अनुक्षरंतिकाकुदंसूर्म्यंसुषिरामिव।सुदेवक्ल
ल्याणदेवःकल्याणमर्मायदेवोवाभवसिवरुणयस्यतेसप्तसिंधवःसिंधुःस्रवणाद्यस्य
तेसप्तस्रोतांसितानितेकाकुदमनुक्षरंतिसूर्मिंकल्याणोर्मिंस्रोतःसुषिरमनुयः
थावीरिटंनेतिकिरंतरिक्षमेवमाहपूर्वंवयतेरुत्तरमितरेवयांसीरंत्यस्मिन्भांसिवा
तदेतस्यामृच्युदाहरंत्यपिनिगमोभवति॥२७॥प्रवावृजेसुप्रयाबर्हिरेषामावि ८५
श्पतीवबीरिटइयाते॥विशामक्तोषसःपूर्वहूतौवायुःपूषास्वस्तयेनियुत्वान्॥प्रवृज्

नेसुप्रायणंबर्हिरेषामायातेसर्वस्यपातारौवापालयितारौवाबीरिटमंतरिक्षंभियोवा
भासोवाततिरपिवोपमार्थेस्यात्सर्वपतीइवराजानौबीरिटेगणेमनुष्याणांरात्र्याविवा
सेपूर्वस्यामभिहूतौवायुश्चनियुत्वान्पूषाचस्वस्त्ययनायनियुत्वान्नियुतोस्याश्वानियु
तोनियमनाद्वानियोजनाद्वाछाभेगातुमितिशाकपूणिःपरीसीमितिव्याख्यातम्
नमेनामस्याअस्येत्येतेनव्याख्यातंसृणिरंकुशोभवतिसरणादंकुशोंचतेराकुंचितो
भवतीतिवानदीयइत्सृण्यःपक्वमेयादित्यपिनिगमोभवत्यंतिकतममंकुशादायात
कमौषधमागछत्वित्यागछत्विति॥२८॥ ॥सज्जिमसश्वतीनयस्यवराहोगाय
तिपवित्रंपुरुषत्वाकिंमित्तंप्रतत्तेभिन्नरएकयापांतमन्युरुवैस्युतासिसइन्द्रियत्कद्द
सैमर्तेपत्नीवंतःसगुरसद्धकश्चंद्रमारुणोमायइंद्राग्नीमानःसमस्यहविषाष्टयकर्म
णिताश्चान्तत्क्देवःप्रवावृजेएकाविंशतिः॥२९॥ ॥इतिनिरुक्तेपूर्वषट्केपं

नि० इ०
४७

चमोध्यायः॥५॥ ॥हरिः ॐ अम्॥ त्वमग्नेद्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्प नं
रि॥ त्वंवनेभ्यस्त्वमोषधीभ्यस्त्वंनृणांनृपतेजायसेशुचिः। त्वमग्नेद्युभिरहोभिस्त्वमाशु
शुक्षणिराशुइतिचशुइतिचक्षिप्रनामनीभवतः क्षणिरुत्तरःक्षणोतेराशुशुचाक्षणो
तीतिवासनोतीतिवाशुशुक्शोचतेः पंचम्यर्थेवाप्रथमातथाहिवाक्यसंयोगआइत्या
कारउपसर्गः पुरस्ताच्चिकीर्षितजउत्तरआशुशोचइषुरितिशुचिःशोचतेर्ज्वलति
कर्मणोयमपीतरः शुचिरेतस्मादेवनिःषिक्तमस्मात्पातकमितिनैरुक्ताः। इंद्रआशा
भ्यस्परिसर्वाभ्योअभयंकरत्। आशादिशोभवंत्यासदनादाशाउपदिशोभवंत्य
भ्यशनाद्वाकाशिर्मुष्टिःप्रकाशनान्मुष्टिर्मोचनाद्वामोषणाद्वामोहनाद्वा। इमेचिदिं
द्ररोदसीअपारेयत्संगृभ्णामघवन्काशिरित्ते। इमेचिदिंद्ररोदसीरोधसीद्यावापृथि ४७
व्यौरोधनाद्रोधःकूलंनिरुणद्धिस्रोतःकूलंरुजतेर्विपरीताल्लोकोविपर्ययेणाप

देवहूतयोयेदेवानाह्वयंतांकुर्वतश्रवणीयानियशांसिदुरुहकराण्यन्यैर्यैःशक्नुवन्त्यज्ञिया
न्नावमारोढुमथयेनाशक्नुवन्यज्ञियान्नावमारोढुमीर्मेवतेन्यविशंतेहैवतेन्यविशंतऋणेहै
वतेन्यविशंतस्मिन्नेवलोकइरिणेइर्मइतिबाहुनामसमीरिततरोभवति। एताविश्वासवना
तूतुमाकृषस्वुपसूनोसहसोयानिदधिषे। एता[illegible]निसर्वाणिस्थानानितूर्णमुपाकुरुष्वस्व
यंबलस्यपुत्रयानिधत्स्वासन्नमंसहसस्त्राणंधनुर्वाकवचंवाकवचंकुअंचितंभवतिका
चितंभवतिकायेचितंभवतीतिवा॥२५॥प्रीणीताश्वान्हितंजयाथःस्वस्तिवाहंरथवा
हंरथमित्कृणुध्वं। द्रोणाहावमवतमश्मचक्रमंसत्रकोशंसिंचतानृपाणं। प्रीणी
ताश्वान्हितंजयथजयनंवोहितमस्तुस्वस्तिवाहंरथंकुरुध्वं द्रोणाहावंद्रुणंद्रुम
मयंभवत्याहावआह्वानादावहआवहनादवतेवातितामहान्भवत्यश्मचक्रमश
नचक्रमसनचक्रमितिवासत्रकोशंसत्राणिवःकोशस्थानीयानिसंदुकोशःकुष्ण

नि॰ वृ॰ ४८

रभ्यस्ता त्वत्पुषिस्तपते र्हर्हितेः । त्यंचिदित्थाकल्पयंशयानं । सुखपयसंसुखमस्य पयः
। विस्रुह आपो भवंति विस्रवणात् । वयाइव रुरुहुः सप्त विस्रुह इत्यपिनिगमो भवति वि
रुध ओषधयो भवंति विरोहणात् । वीरुधः पारयिष्ण्व इत्यपिनिगमो भवति नक्ष
द्दाभमश्नुवानं दाभमभ्यशनेन दभ्नोतीति । नक्षद्दाभं ततुरिं पर्वतेष्ठाम् इत्यपिनिगमो भ
वत्यस्कृधोयुरकृध्वायुः कृधितिह्रस्वनाम निकृत्तं भवति । यो अस्कृधोयुरजरः स्वर्वा
नित्यपिनिगमो भवति निःश्रभा निःश्रथ्यहारिणः ॥ ३ ॥ आजासः पूषणं रथे निःश्रंभा
स्ते जनश्रियं । देवंवहं तु बिभ्रतः । आवहंत्वजाः पूषणं रथे निःश्रथ्याहारिणस्ते जन
श्रियं जातश्रियं बृबदुक्थो महदुक्थो भक्तव्यमस्माउक्थमिति बृबदुक्थो वा । ऋदूदरेण स
ख्या सचेयेत्यपिनिगमो भवत्यृदूपे इत्युपरिष्टाद्व्याख्यास्यामः पुलुकामः पुरुकामः पु ४८
लुकामो हि मर्त्य इत्यपिनिगमो भवत्यसिन्वती असंख्यादंत्यौ । असिन्वती बप्सती भूर्य
त्त बृबदुक्थं हवामह इत्यपिनिगमो भवत्यृदूदरः सोमो मृदूदरो मृदुरुदरेष्विति वा ॥

त्त इत्यपिनिगमो भवति कपनाः कंपनाः क्रिमयो भवंति । मेषथाद्वृक्षं कपनेव वेधस इत्यपिनि
गमो भवति भाऋजीकः प्रसिद्धभाः । धूमकेतुः समिधा भाऋजीक इत्यपिनिगमो भवति रुजा
ना नद्यो भवंति रुजंति कूलानि । संरुजानाः पिपिष इंद्रशत्रुरित्यपिनिगमो भवति जूर्णिर्जू
र्णतेर्वा इव तेर्वा हूनोतेर्वा । क्षिप्राज्जूर्णिर्नवक्षतीत्यपिनिगमो भवति परिध्रंसमोमना वां वयो
गात् । पर्यवाहं ध्रंसमहरवनायान्नं ॥ ४ ॥ उपलप्रक्षिण्युपलेषु प्रक्षिणात्युपलप्रक्षेपि
णी वेंद्र ऋषाश्चप्रयच्छ उभेप्सकेन जीवंति तेषामेकः प्रत्येकवाचशाकटः शाकिनी ती
गावो जालमस्यंदनं वनमुदधिः पर्वतो राजा दुर्भिक्षे नव वृत्तय इति सा निगद
व्याख्याता ॥ ५ ॥ कारुरहं ततो भिषगुपलप्रक्षिणी नना । नानाधियो वसूयवोनु
गा इव तस्थिमेंद्रायेंदो परिस्रव ॥ कारुरहमस्मि कर्ता स्तोमानां ततो भिषक् त
इति संतानन्नाम पितुर्वा पुत्रस्य वोपलप्रक्षिणी सक्तुकारिका नना नमतेर्माता वा दु

नि॰पू॰ हिनावानानां धियो नानाकर्माणो वस्त्र्यवो वसुकामा अन्वास्थिता स्मो गा इव वलोकमिं
४९ द्रायं दोपरिस्तवेत्यध्येषणा ॥ आसीन ऊर्ध्वामुपसि क्षिणात्युपस्थे प्रकलविद्गिरिभ
वति कला श्चवेद प्रकला श्चद्रुर्मित्रा अतः प्रकलविन्निमिमान इत्यपि निगमो भवत्यभ्यर्य
ध्वाभ्यर्धयन्यजति । सिसक्ति इषा अभ्यर्धयज्वेत्यपि निगमो भवति । क्षः ईशिषे
ईक्षे हि वस्व उभयस्य राजन्नित्यपि निगमो भवति क्षोणस्य क्षयणस्य ॥ महः क्षो
णस्याश्विना कण्वायेत्यपि निगमो भवति ॥ ६ ॥ अस्मे ते बंधुः ॥ वयमित्यर्थः ॥ अ
स्मे यात नासत्या सजोषाः ॥ अस्मानित्यर्थः ॥ अस्मे समानेभिर्वृषभ पौंस्येभिः ॥
अस्माभिरित्यर्थः ॥ अस्मे प्रयंधि मघवन्नृजीषिन्निंद्र रायो विश्ववारस्य भूरेः ॥
अस्मभ्यमित्यर्थः ॥ अस्मे आराच्चिद्द्वेषः सनुतर्युयोतु ॥ अस्मदित्यर्थः ॥ ऊर्व इव प ४९
प्रथे कामो अस्मे ॥ अस्माकमित्यर्थः ॥ अस्मे धत्त वसवो वसूनि ॥ अस्मास्वित्यर्थः ॥

रहुरपारयत्संगृभ्णासि मघवन्काशिरित्ते महान्न ॥ अहस्तमिंद्र संपिणक् कुणारुं ॥ अहस्त
मिंद्र कृत्वा संपिण्ड्ढि परिक्वणनं मेघं ॥ १ ॥ अलातृणो वल इंद्र व्रजो गोः पुरा हंतोर्भयमानो
व्यार ॥ सुगान्पथो अकृणोन्निरजे गाः प्रावन्वाणीः पुरुहूतं धमंतीः ॥ अलातृणो व
लमातर्दनो मेघो वलो वृणोतेर्व्रजत्यंतरिक्षे गोरेतस्या माध्यमिका वाचः पुरा हननाद्
भयमानो व्यार ॥ सुगान्पथो अकृणोन्निरजे गाः ॥ सुगमनान्पथोऽकरोन्निर्गमनाय गा
वा प्रावन्वाणीः पुरुहूतं धमंतीः ॥ आपो वा वहनाद्वाचो वा वदनाद्बहुभिराहूतमुदकं ना
भवति धमतिर्गतिकर्मा ॥ २ ॥ उद्वृह रक्षः सहमूलमिंद्र वृश्चा मध्यं प्रत्यग्रं शृणीहि
आ कीवतः सललूकं चकर्थ ब्रह्मद्विषे तपुषिं हेतिमस्य ॥ उद्धर रक्षः सहमूलं मूल
मिंद्र मूलं मोचनाद्वा मोषणाद्वा मोहनाद्वा वृश्च मध्यं प्रति शृणीह्यग्रमागतं भवत्य य
कियतो देशात् सललूकं संलुब्धं भवति पापकमिति नैरुक्ताः सररूकं वा स्यात्सर्तेर्

पाथोंतरिक्षंपथाव्याख्यातंश्येनोनदीयन्नन्वेतिपाथइत्यपिनिगमोभवत्युदकमपिपा
थउच्यतेपानात्।।आचष्टआसांपाथोनदीनामित्यपिनिगमोभवत्यन्नमपिपाथउ
च्यतेपानादेव।देवानांपाथउपवक्षिविद्वानित्यपिनिगमोभवतिसवीमनिप्रसवेदेव
स्यवयंसवितुःसवीमनीत्यपिनिगमोभवतिसप्रथाःसर्वतःपृथुः।त्वमग्नेसप्रथाअ
सीत्यपिनिगमोभवतिविदथानिवेदनानि।विदथानिप्रचोदयन्नित्यपिनिगमोभ
वति।।७।।श्रायंतइवसूर्यंविश्वेदिंद्रस्यभक्षत।वसूनिजातेजनमानओजसाप्र
तिभागंनदीधिम।समाश्रिताःसूर्यमुपतिष्ठंतेपिवोपमार्थेस्यात्सूर्यमिवेंद्रमुपति
ष्ठंतइतिसर्वाणींद्रस्यधनानिविभक्ष्यमाणाःसयथाधनानिविभजतिजातेचजनि
ष्यमाणेचतंवयंभागमनुध्यायामओजसाबलेनओजओजतेर्वोब्जतेर्वाआशीराश्रय
णाद्वाश्रयणाद्वाथेपमितराशीराशास्तेः।इंद्रायगावआशिरमित्यपिनिगमोभवति

नि०प०
६०

सामेसत्याशीर्देवेषितिच॥यदातेमर्तोअनुभोगमानळादिद्ग्रसिष्ठओषधीरजीगः॥
यदातेमर्तोभोगमन्वापद्थग्रसिष्ठतमओषधीरगारीजिगर्तिगिरतिकर्मावागृणाति
कर्मावागृह्णातिकर्मावा॥मूराअमूरनवयंचिकित्वोमहित्वमग्नेत्वमंगवित्से॥मूढावय
स्मामूढस्त्वमसिनवयंविद्मोमहित्वमग्नेत्वंतुवेत्थशशमानःशंसमानः।योवायज्ञैः
शशमानोहदाशतीत्यपिनिगमोभवति॥दिवोदेवानच्याकृपा।देवोदेवान्प्रत्यक्तयाकृ
पाकृप्रकृपतेर्वाकल्पतेर्वा॥८॥अश्रवंहिभूरिदावत्तरावांविजामातुरुतवाघास्या
लात्॥अथासामस्यप्रपतीयुवभ्यामिंद्राग्नीस्तोमंजनयामिनव्यं॥अश्रौषंहिबहु
दातृतरावांविजामातुरसुसमाप्ताज्जामातुर्विजामातेतिशाखद्धाक्षिणाजाःक्रीताप
तिमाचक्षतेऽसुसमाप्तइववरोभिप्रेतोजामाताजाअपत्यंतन्निर्मातातवाघस्याला ६०
दपिचस्यालात्स्यालआसन्नःसंयोगेनेतिनैदानाःस्याल्लाजानावपतीतिवालाजा

लाजतेः स्पंशःस्पर्शस्यतेः स्पर्शमशनपवनं स्पृणातेर्वाथसोमस्यप्रदानेनयुवाभ्यामिंद्रा
ग्नीसोमंजनयामिनव्यं ॥ नवतरमोमासइत्युपरिष्टाद्व्याख्यास्यामः ॥ ९ ॥ सोमानं
स्वरणंकृणुहिब्रह्मणस्पते ॥ कक्षीवंतंयऔशिजः ॥ सोमानंसोतारंप्रकाशनवंतंकु
रुब्रह्मणस्पतेकक्षीवंतंयऔशिजःकक्षीवान्कक्ष्यावानौशिजउशिजःपुत्रउशि
ग्वष्टेःकांतिकर्मणोपित्वयंमनुष्यकक्ष्यएवाभिप्रेतःस्यात्तंसोमानंसोतारंमाप्रकाश
नवंतंकुरुब्रह्मणस्पते ॥ १० ॥ इंद्रासोमासमघशंसमभ्य१घंतपुर्ययस्तुचरुरग्निवाँ
इव ब्रह्मद्विषेक्रव्यादेघोरचक्षसेद्वेषोधत्तमनवायंकिमीदिने ॥ इंद्रासोमामघ
स्यशंसितारमघंहंतेर्निर्हसितोपसर्गआहंतीतितपुस्तपतेश्चरुर्मृच्चयोभवतिच
रतेर्वासमुच्चरंत्यस्मादापोब्रह्मद्विषेब्राह्मणद्वेष्ट्रेक्रव्यादेक्रव्यमदतेघोरचक्षसेघो
रख्यानायक्रव्यंविकृत्ताज्जायतइतिनैरुक्ताद्वेषोधत्तमनवायमनवयवंयदन्येनव्य

नि०पू० पेथुरद्वेषसइतिवा।किमीदिनेकिमिदानीमितिचरतेकिमिदंकिमिदमितिवा।पिशुनायच
६१ रते।पिशुनःपिंशतेर्विपिंशतीति।११।कृणुष्वपाजःप्रसितिंनपृथ्वींयाहिराजेवाम
वाँइभेन।तृष्वीमनुप्रसितिंद्रूणानोस्तासिविध्यरक्षसस्तपिष्ठैः।कृणुष्वपाजःपा
जःपालनात्प्रसितिमिवपृथ्वींप्रसितिःप्रसयनात्तंतुर्वाजालंवा।याहिराजेवामात्यवा
नभ्यमनवांस्ववान्वेरावान्वाइभेनगणेनगतभयेनहस्तिनेतिवा।तृष्व्यानुप्रसित्याद्रूणान
स्तृष्वीतिक्षिप्रनामतरतेर्वात्वरतेर्वा।असितासिविध्यरक्षसस्तपिष्ठैस्तप्ततमैस्तृप्त
तमैः।प्रपीडिततमैरितिवा।यस्तेगर्भममीवादुर्णामायोनिमाशये।अमीवाभ्यमनेन
व्याख्याता।दुर्णामाक्रिमिर्भवतिपापनामा।क्रिमिःक्रव्येमेद्यतिक्रमतेर्वास्यात्सर
णकर्मणःक्रामतेर्वा।अतिक्रामंतोदुरितानिविश्वा।अतिक्रममाणादुर्गाणिगम ६९
नानिसर्वाण्यपायदनयाक्षिप्रोपवीयतेव्याप्तिर्वाभ्ययंवा।अघेपरेहीत्यपिनिगमो

धातुरायइत्यपिनिगमोभवतिसकविक्रतुः कल्याणविद्यः। आम्नेयाहिसक्रविक्रतेभिरवोडित्य
पिनिगमोभवत्यानुषगितिनामानुपूर्वस्यानुषक्तंभवति। स्तृणातिबर्हिरानुषगित्यपिनिग
मोभवति। तुर्वणिस्तूर्णवनिः। सतुर्वणिर्महांऽअरेणुपौंस्येइत्यपिनिगमोभवतिगिर्वणादे
वोभवतिगीर्भिरेनंवनयंति। जुष्टंगिर्वणसेबृहदित्यपिनिगमोभवति।।१४।।असूर्तेसूर्ते
रजसिनिषत्तेयेभूतानिसमकृण्वन्निमानि।।असृतसमीरिताः सृतसमीरितवासमीरि
तामाध्यमकादेवगणायेनसेनष्टथिवींतर्पयंतोभूतानिचकुर्वंतितआयजंतेत्यत्रिक्रां
तंप्रतिवचनं।।सम्यक्सातइन्द्रऋष्टिः। आमाकेतिवाभ्यक्केतिवा। याहश्मिन्धायितमप
स्यपाविद्ध। याहशोधायितमपस्यपस्यपाविद्ध। उस्रः पितेवजारयायियज्ञैः उस्र
इवगोपितजारयायियज्ञैः।।१५।।प्रवोच्छाजुजुषाणासोअस्थुरभूतविश्वेऽअग्रियोतवाजाः
।आस्थुर्वोजोषयमाणाअभवतसर्वेऽग्रगमनेनेतिवाग्रगरणेनेतिवाग्रगलनेतिवाग्रयाल

नेतिवाग्रसंपादिनइतिवा। पिवाग्रमित्येतदनर्थकमुपबंधमाददीत। अधीदिंद्रप्रस्थि
तेमाहवींषिचनोदधिष्वपचतोतसोमं। अधीदिन्द्रप्रस्थितेमाहवींषिचनोदधिष्वपचनइत्यन्न
नामपचतिर्नामीभूतस्तमेदस्तः प्रतिपचताग्रभीष्टमित्यपिनिगमोभवत्यप्रिवामेदसः
श्वपशोश्वसात्वंद्विवचनंसाद्यत्वैकवचनार्थः प्रसिद्धंतद्भवतिपुरोळाऽअग्नेपचतइति
पश्याशुरश्वआपोभवंतिधुन्वंसंरुध्यंनिक्रंतस्यहिशुरुधःसंतिपूर्वीरित्यपिनिगमोभव
त्यमिनोमितमात्रोमहान्भवत्यमितोवा। अमिनः सहोभिरित्यपिनिगमोभवति। जज्झती
रापोभवंतिशब्दकारिण्यः। मरुतोजज्झतीरिवेत्यपिनिगमोभवत्यप्रतिष्कुतोप्रतिष्कुतोप्र
तिस्खलितोवा। अस्मभ्यमप्रतिष्कुतइत्यपिनिगमोभवतिशाशदानः शाशाद्यमानः।
प्रस्वामतिमनिरछाशदानइत्यपिनिगमोभवति।।१६।।सृप्रः सर्पणादिदमपीतरत्सृप्र
मेतस्मादेवसर्पिर्वातैलंवा। सृप्रकरस्नमूतयइत्यपिनिगमोभवतिकरस्नौबाहूकर्मणां

नि०पू० ६३ प्रस्नातारोसुशिप्रमेतेनव्याख्यातं।वाजेभिःशिप्रिन्गोमतीत्यपिनिगमोभवति।शिप्रेहनूना
सिकेवाहनुर्हंतेर्नासिकानसतेः विष्यस्वशिप्रेविसृजस्वधेनेत्यपिनिगमोभवतिधेनाद
धातेःरंसुरमणात्।सचित्रेणचिकेतेरंसुभासेत्यपिनिगमोभवतिद्विबर्हाद्वयोः स्थानयोः
परिवृढोमध्यमेचस्थानउत्तमेचउतद्विबर्हाअमिनःसहोभिरित्यपिनिगमोभवत्यक्रआ
क्रमणात्।।अक्रोनबभ्रिःसमिथेमहीनामित्यपिनिगमोभवत्युराणउरुकुर्वाणः।दूतइ
यसेप्रदिवउराणइत्यपिनिगमोभवतिस्तियाआपोभवंतिस्त्यायनात्।वृषासिंधूनांवृष
स्तियानामित्यपिनिगमोभवतिस्तिपाःस्तियापालनउपस्थितान्पालयतीतिवा।सनःस्ति
पाउतभवातनूपाइत्यपिनिगमोभवतिजबारुजवमानरोहिजरमाणरोहिगरमाणरो
हीतिवा।अग्रेरूपआरुपितंजबार्वित्यपिनिगमोभवतिजरूथंगरूथंगृणातेः।जरू ६३
थंहन्यक्षिरायेपुरंधिमित्यपिनिगमोभवतिकुलिशइतिवज्रनामकूलशातनोभवति

भवत्यमतिरमामयीमतिरात्ममयी।।ऊर्ध्वायस्यामतिर्भाअदिद्युतत्सवीमनीत्य
पिनिगमोभवतिश्रुष्टीतिक्षिप्रनामाशुअष्टीति।।१२।।तांअध्वरउशतोयक्ष्यग्ने
श्रुष्टीभगंनासत्यापुरंधिं।।तानध्वरेयज्ञउशतःकामयमानान्यजाग्नेश्रुष्टीभगंना
सत्यौचाश्विनौसत्यावेवनासत्यावित्यौर्णवाभःसत्यस्यप्रणेतारावित्याग्रायणो
नासिकाप्रभवौबभूवतुरितिवापुरंधिर्बहुधीस्तत्कःपुरंधिर्भगःपुरस्तात्तस्यान्वा
देशइत्येकमिंद्रइत्यपरंसबहुकर्मतमःपुरांचदारयितृतमोवरुणइत्यपरंतंप्रज्ञ
यास्तौति।इमामूनुकवितमस्यमायामित्यपिनिगमोभवतिरुशदितिवर्णनामरो
चतेर्ज्वलतिकर्मणः।समिदस्यरुशददर्शिपाजइत्यपिनिगमोभवति।।१३।।अस्ति
हिवःसजात्यंरिशादसोदेवासोअस्त्याप्यं।।अस्तिहिवःसमानजातितारेशय
दारिणोदेवाअस्त्याप्यमाप्यमाप्नोतेः सुदत्रःकल्याणदानः।त्वष्टासुदत्रोवि

स्कंधांसीव कुलिशेना विवृक्णाहिः शयत उपपृक्पृथिव्याः ।स्कंधो वृक्षस्य समास्कन्नो भ
त्ययमपीतरः स्कंध एतस्मादेवास्कन्नं काये अहिः शयत उपपर्चनः पृथिव्याः तुंजस्तुंजतेर्दान
कर्मणः ॥१७॥ तुंजेतुंजे य उत्तरे स्तोमा इंद्रस्य वज्रिणः । न विंधे ऽस्य सुष्टुतिं ॥ दाने दाने य
उत्तरे स्तोमा इंद्रस्य वज्रिणो नास्य ते विंदामि समाप्तिं स्तुतेर्बर्हणा परिबर्हणा । बृहच्छ्रवा
असुरो बर्हणा कृत इत्यपि निगमो भवति ॥१८॥ यो ऽस्मै घ्रंस उत वा य ऊधनि सोमं
सुनोति भवति द्युमाँ अह । अपाप शक्रस्ततनुष्टिमूहति तनूशुभ्रं मघवा यः कवासखः
घ्रंस इत्यहर्नाम ग्रस्यंते ऽस्मिन्रसा गोरूध उद्धततरं भवत्युपोन्नद्धमिति वा स्नेहानुप्रदा
नसामान्याद्रात्रिरप्यूध उच्यते स यो ऽस्मा अहन्यपि वा रात्रौ सोमं सुनोति भवत्यह द्यो
तनवानपोहत्यपोहति शक्रस्ततनिषुं धर्मसंतानादपेतमलंकरिष्णुमयज्वानं त
नूशुभ्रं तनूशोभयितारं मघवा यः कवासखो यस्य कपूयाः सखायः । न्या विध्यदिलीबि

हौ

विष्पितो विज्ञाप्न:।। पारं नो अस्य विष्पितस्य पर्षन्नित्यपि निगमो भवति ।।
नि० पू० शस्य दृढ्हा विशृंगिणमभिनच्छुष्णमिंद्रः। निर विध्यदिलाबिलशयस्य दृढ्हानि व्यभिनच्छृंगि
५४ णं शुष्णमिंद्रः।।१९।। अस्मा इदु प्रभरा तूतुजानो वृत्राय वज्रमीशानः कियेधाः। गोर्न पर्व वि
रदा तिरश्चेष्यन्नर्णांस्यपां चरध्यै। अस्मै प्रहर तूर्णं त्वरमाणो वृत्राय वज्रमीशानः कियेधाः
कियद्धा इति वा क्रममाण धा इति वा गोरिव पर्वाणि विरद मेघस्येष्यन्नर्णांस्यपां चरणाय
भृमिर्भ्रम्यतेः। भृमिरस्यृषिकृन्मर्त्यानामित्यपि निगमो भवति।।२०।। तन्नस्तुरीपमद्भुतं
पुरुवारं पुरुत्मना। त्वष्टा पोषाय विष्यतु रायो नाभा नो अस्मयुः। तन्नस्तूर्णापि महत्स
र्वतमात्मना त्वष्टा धनस्य पोषाय विष्यत्वित्यस्मयुरस्मान्कामयमानो राक्किनो वास्फ
नम रपतेः स्फातेर्वा। वास्पिनस्यायोरित्यपि निगमो भवति। ऋंजतिः प्रसाधनकर्मा। आवऋं
जस ऊर्जां व्युष्टिष्वित्यपि निगमो भवत्यृजुरित्यप्यस्य भवति। ऋजुनीती नो वरुण इत्यपि ५४
निगमो भवति प्रतद्वसू प्राप्तवसू। हरी इंद्र प्रतद्वसू अभिस्वरेत्यपि निगमो भवति।।२१।।

कूलगमनाद्वा। कुरुतनेः कृन्ततेः कूरमित्यप्यस्य भवति कूलं कुष्णातेर्विकुषितं भवतीति वृत्तो व्याख्या
तो जिन्वतिः प्रीतिकर्मा। भूमिं पर्जन्या जिन्वंति दिवं जिन्वंत्यग्नय इत्यपि निगमो भवति।।
२२।। अमत्रो मात्रो महान्भवत्यभ्यमितो वा। महाँ अमत्रो वृजने विरप्शीत्यपि निगमो भ
वति तद्वेद ऋचीषमः स्तूयते वा ऋचा समोऽनर्शरातिमनश्लीलदानमश्लीलं पापकम
श्रिमद्विषमं। अनर्शरातिं वसुदामुपस्तुहीत्यपि निगमो भवत्यनर्वाप्रत्यृतोऽन्यस्मिन्।।
अनर्वाणं वृषभं मंद्रजिह्वं बृहस्पतिं वर्धया नव्यमर्कैः। अनर्वमप्रत्यृतमन्यस्मिन्वृ
षभं मंद्रजिह्वं मंदनजिह्वं मोदनजिह्वमिति वा। बृहस्पतिं वर्धय नव्यमर्कैरर्चनीयैः स्तो
मैरसामि सामि प्रतिषिद्धं सामि स्यतेः। असाम्योजो बिभृथा सुदानवः। असुसमाप्तं ब
लं बिभृथ कल्याणदानाः।।२३।। मा त्वा सोमस्य गल्दया सदा याचन्नहं गिरा। भूर्णिं मृगं न ५५
सवनेषु चुक्रुधं क ईशानं न याचिषत्।। मा चुक्रुधं त्वां सोमस्य गालनेन सदा याचन्नहं गि

रा गीत्या स्तुत्या भूर्णिमिव मृगं न सवनेषु चुक्रुधं क ईशानं न याचिष्यत इति गल्दा ध
मनयो भवंति गलनमासु धीयते।। आ त्वा विशंत्विंदव आ गल्दा धमनीनां। नानाविभक्ति
त्यते भवत आगलना धमनीनामित्यर्थः।।२४।। न पापासो मनामहे नारायासो न जळ
ह्ववः। न पापमन्या महे नाधना न ज्वलनेन हीनाः। अस्त्यस्मासु ब्रह्मचर्यमध्ययनं तपो दा
नकर्मेत्यृषिरवोचद्बकुरो भास्करो भयंकरो भासमानो द्रवतीति वा।।२५।। यवं वृके
णाश्विना वपंतेषं दुहंता मनुषाय दस्रा।। अभि दस्युं बकुरेणा
धमंतोरु ज्योतिश्चक्रथुरार्याय।। यवमिव वृकेणाश्विनौ निवपंतौ वृको लांगलं भवति
विकर्तनाल्लांगलं लगतेर्लांगूलवद्वा लांगूलं लगतेर्लंगतेर्लंबतेर्वा। अन्नं दुहंतौ मनुष्या
य दर्शनीयावभिधमंतौ दस्युं बकुरेण ज्योतिषा वोदकेन वार्य ईश्वरः पुत्रो बकनायाः स्वकु
।कुसीदिनो भवंति द्विगुणकारिणो वा द्विगुणदायिनो वा द्विगुणं कामयंत इति वा। इंद्राविष्णा

नि॰ पू॰
५६

न्वेकनाटाँ अहर्दृशऽउतक्रत्वापणीँरभि॥ इंद्रोयः सर्वान्वेकनाटानहर्दृशः सूर्यदृशोय
इमान्यहानिपश्यंतिनपराणीतिवाभिभवतिकर्मणापणींश्चवणिजः॥२६॥ जीवान्नो
अभिधेतनादित्यासः पुराहथात्। कदुस्थहवनश्रुतः। जीवतोनोभिधावतादित्याः पुराह
ननात्कनुस्थहवनश्रुतइतिमत्स्यानांजालमापन्नानामेवदार्षंवेदयंतेमत्स्यामधावुदके
:स्यंदंतेमाद्यंतेन्योन्यंभक्षणायेतिवाजालंजलचरंभवतिजलेभवंवाजलेशयंवांहुरों
हस्वानंहूरणमप्यस्यभवति।हूरपदन्नंहूरणाउर्वित्यपिनिगमोभवति।सप्तमर्यादाःक
वयस्ततक्षुस्तासामेकामिदभ्यंहुरोगात्।सप्तैवमर्यादाःकवयश्चक्रुस्तासामेकामप्य
भिगच्छन्नंहस्वान्भवतिस्तेयमतल्पारोहणंब्रह्महत्यांभ्रूणहत्यांसुरापानंदुष्कृतस्य
कर्मणःपुनःपुनःसेवांपातकेनृतोद्यमितिबतइतिनिपातःखेदानुकंपयोः॥२७॥बतो ५६
बतासियमनैवतेमनोहृदयंचाविदाम।अन्याकिलत्वांकक्ष्येवयुक्तंपरिष्वजातेलिबुजे

हिनोतानोअध्वरंदेवयज्या।हिनोतब्रह्मसनयेधनानां॥ ऋतस्ययोगेविष्यध्वमूधःश्रुष्टी
वरीर्भूतनास्मभ्यमापः।प्रहिणुतनोध्वरंदेवयज्यायैप्रहिणुतब्रह्मधनस्यसननायऋत
स्ययोगेयज्ञस्ययोगेयाज्ञेशकटइतिवाशकटंशकृदितंभवतिशनकैस्तकतीतिवाशब्दे हि
नतकतीतिवा।श्रुष्टीवरीर्भूतनास्मभ्यमापः।सुखवत्योभवतास्मभ्यमापः।चोष्कूयमा
णइंद्रभूरिवामं।ददद्दिंद्रबहुवननीयं।एधमानद्विळुभयस्यराजाचोष्कूयतेविशइंद्रोम
नुष्यान्॥ व्युदस्यत्येधमानानहंइष्यसुन्वतःसुन्वतोभ्याददधात्युभयस्यराजादिव्यस्य
चपार्थिवस्यचचोष्कूयमाणइतिचोष्कूयतेश्चर्करीतद्वृत्तं।स्मत्स्वयमित्यर्थः।उपप्रागा
त्सुमन्मेधायिमन्म।उपप्रैतुमांस्वयंयन्मेमनोध्यायिपयज्ञेनेत्याश्वमधिकोमंत्रो।दिविष्टि
षुदिवएषणेषु।स्थूरंराधःशताश्वंकुरुंगस्यदिविष्टिषु।स्थूरःसमाश्रितमात्रोमहानमे
वत्यणुरनुस्थवायांसमुपसर्गोलुप्तनामकरणोयथासंप्रतिकुरुंगोराजाबभूवकुरुगमनाद्वा

वहृक्षं।बतोबलादतीतो भवतिदुर्बलोबतासियमेनैवतेमनोहृदयंच विजानीमोन्याकिल
त्वांपरिष्वक्ष्यतेकक्ष्येवयुक्तंलिबुजेववृक्षंलिबुजाव्रततिर्भवतिलीयतेविभजंतीतिव्रत
तिर्वरणाच्चसयनाच्चततनाच्चवाताप्यमुदकंभवतिवातएतदाप्याययतिपुनानोवाता
प्यंविश्वश्चंद्रमित्यपिनिगमोभवति।वनेनवायोन्यधायिचाकन्।वनइववायोवेःपुत्र
श्चायन्निितिवाकामयमानाइतिवावेतिचयइतिचचकारशाकल्यउदात्तंत्वेवमाख्या
तमभविष्यदसुसमाप्तश्चार्थोरथयतीतिसिद्धस्तत्रप्लुररथकामयतइतिवेदवोरथय
तीत्यपिनिगमोभवति।।२८।।धेनुंनइषंपिन्वतमसक्रां।असंक्रमणीं।आधवआध
वनात्।मतीनांचसाधनंविप्राणांचाधवमित्यपिनिगमोभवत्यनवब्रवोनवक्षिप्तवच
नः।विजेषकृदिंद्रइवानवब्रवइत्यपिनिगमोभवति।।२९।।अरायिकाणेविकटेगिरिं
गछसदान्वे।शिरिंबिठस्यसत्वभिस्तेभिष्ट्वाचातयामसि।अदायिनिकाणेविकटेकाणे।

९

विक्रांतदर्शन इत्यौपमन्यवः कपतेर्वा स्यादणूभावकर्मणः कपातिः शब्दाणूभावे भाष्यतेनुक
पाती। तिमात्राणूभावात्काणोदर्शनाणूभावात्काणो। विकटो विक्रांतगतिरित्यौपमन्यवः।
कुटतेर्वा स्याद्विपरीतस्य विकुटितो भवति गिरिंगच्छ सदान्वे नुबेः शब्दकारिके। शिरिंबिठस्य
सत्वभिः। शिरिंबिठो मेघः शीर्यते बिठे बिठमंतरिक्षं बिठं वीरिटं तेन व्याख्यातं तस्य सत्वैरुद
कैरिति स्यात्तैष्ट्वा चातयामो पि वा शिरिंबिठो भारद्वाजः कालकर्णोपेतो लक्ष्मी निर्नाश
यांचकार तस्य सत्वैः कर्मभिरिति स्यात्तैः ष्ट्वा चातयामश्चातयतिर्नाशने पराशरः परा
शीर्णस्य वसिष्ठस्य स्थविरस्य जज्ञे पराशरः शतयातुर्वसिष्ठ इत्यपि निगमो भवतींद्रोपि
पराशर उच्यते पराशातयिता यातूनां। इंद्रो यातूनामभवत्पराशर इत्यपि निगमो भव
ति क्रिविर्दती विकर्तनदंती यत्रा वो दिद्युद्रदति क्रिविर्दतीत्यपि निगमो भवति करूळती ६७
कृत्तदती अपि वा देवं कंचित्कृत्तदंतं दृष्ट्वैवमवक्ष्यत्॥३०॥ वामं वामंत आदुरे देवो ददा